# VEDA, SMRITI & UPANISHAD

CORECOURSE

For

## BA SANSKRIT

V SEMESTER

(2011 Admission)

## UNIVERSITY OF CALICUT

**SCHOOL OF DISTANCE EDUCATION**

CALICUT UNIVERSITY PO, MALAPPURAM, KERALA, INDIA - 673 635

# UNIVERSITY OF CALICUT

SCHOOL OF DISTANCE EDUCATION

## BA SANSKRIT

V SEMESTER

CORE COURSE

## VEDA, SMRITI & UPANISHAD

*Prepared by :* Dr. Narayanan. *N.M.*
*Assistant Prof. in Sanskrit*
*Sree Kerala Varma College,*
*Thrissur.*

*Scrutinized by:*

Layout: Computer Section, SDE

**(c)**
Reserved

# SYLLABUS

## Veda Smriti & Upanishad


**Module 1** **4**

Selected Suktas from Rigveda

Agnisukta

Indrasukta

Ushassukta

Akshasukta with Detailed Explanation of Mantras

**Module 2** **36**

Manusmrithi

93 Slokas from the 8th Chapter of Manusmrithi with Anvaya and Vyakhya

**Module 3** **63**

Isavasyopanishad with Anvaya and Vyakhya

# Module 1

## ऋग्वेदस्य अग्निसूक्तम्

सन्दर्भ :

विश्वसाहित्यस्य प्रथमो ग्रन्थः ऋग्वेदः चतुर्षु वेदेषु प्रथमगणनीयो भवति। अस्मिन् वेदे दशमण्डलानि, ८५ अनुवाकानि १०१७ सूक्तानि १०४७२ मन्त्राश्च सन्ति। अष्टाष्टकानि, ६४ अध्यायाः २००६ वर्गाः २०८७५ अर्धर्चः १९३८१६ पदाश्च इति अन्यो विभाजनप्रकारः। अग्निसूक्तेनैव अस्य ऋग्वेदस्य प्रारम्भः। सूक्तस्यास्य द्रष्टा ऋषिः वैश्वामित्रो मधुच्छन्दाः, छन्द गायत्री, देवता अग्निः। अस्मिन् सूक्ते नवमन्त्राः सन्ति।

**1. अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम्।**
**होतारं रत्नधातमम्।।**

अन्वयः अर्थश्च

| | | |
|---|---|---|
| यज्ञस्य पुरोहितं | - | आहवनीयरूपेण अवस्थितं |
| देवं होतारं | - | दानादिगुणयुक्तं देवानॉ यज्ञेष्वाह्वातारं |
| ऋत्विजं | - | ऋत्विग्रूपं |
| रत्नधातमं अग्निं ईळे | - | रत्नं धारयितारं अग्निं स्तौमि। |

भावार्थः

आहवनीयरूपेणावस्थितं सर्वाभीष्टप्रदायकं यागेषु देवान् आह्वातारं ऋत्विग्रूपं रत्नधारिणं अग्नेः अधिष्ठानदेवतां अहं स्तौमि।

**2. सन्दर्भः**

अग्नि : सर्वैः स्तोतुं योग्यो भवतीति प्रतिपाधते।

**अग्नि : पूर्वेभिरृषिभि रीडयो नूतनै रुत।**
**स देवाँ एह वक्षति ।।**

**अन्वयः अर्थश्च**

| | | |
|---|---|---|
| अग्निः पूर्वेभिः ऋषिभिः | - | पुरातनैरतीन्द्रियार्थदर्शिभिः |
| नूतनैरुत | - | इदानीन्तनैरपि |
| ईड्यः | - | स्तुत्यः |
| स देवान् आ इह वक्षति | - | आवहतु (आह्वानं करोतु) |

भावार्थ

अग्नि प्राचीनैः अतीन्द्रियार्थदर्शिभिः अर्वाचीनैश्च ऋषिभिः स्तोतुं योग्यो भवती। एतादृशः अग्निः सर्वानपि देवान् अस्यां यज्ञशालायां आह्वयतु।

3. **सन्दर्भः**

अग्नेरनुग्रहेण यजमानः सर्वधा अभिवृद्धिं प्राप्नोति

**अग्निना रयिमश्नवत् पोषमेव दिवे दिवे।**

**यशसं वीरवत्तमम्।।**

**अन्वयः अर्थश्च**

| | | |
|---|---|---|
| अग्निना | - | निमित्तभूतेन यजमानः |
| दिवे दिवे पोषं एव | - | अनुदिनं वर्धमानमेव |
| यशसं | - | दानादियशोयुक्तं |
| वीरवत्तमम् | - | पुत्रभृत्यादि वीरपुरुषोपेतं |
| रयिं अश्नवत् | - | धनं प्रप्नोति। |

**भावार्थः**

अग्नेरनुग्रहेण यजमानः अनुदिनं वर्धमानो भविष्यति, तथा दानादिसत्कर्मभिः विशिष्टकीर्तिं प्राजोति, एवञ्च वीरपुत्रभृत्यादिभिः सह विपुलं सम्पदमपि प्राप्नोति।

4. **सन्दर्भः**

हिंसारहितं यज्ञमेव देवानं प्रीतिकरमिति प्रतिपादयति।

**अग्ने यं यज्ञमध्वरं विश्वतः परिभूरसि।**

**स इद् देवेषु गच्छति।।**

**अन्वयः अर्थश्च**

| | | |
|---|---|---|
| हे अग्ने (त्वं) यं अध्वरं यज्ञं | - | हिंसारहितं यज्ञं |
| विश्वतः परिभूः असि | - | सर्वासु दिक्षु परितः प्राप्तवान् |
| स इत् देवेषु गच्छति | - | स यज्ञ एव देवान् प्राप्नोति। |

**भावार्थ**

हे अग्ने भवान् हिंसारहितं यं यज्ञं सर्वतोभावेन अप्राप्नुवत् तदेव यज्ञं प्रीतियुक्तं भूत्वा स्वर्गस्थान् देवान् प्राप्नोति, अर्थात् हिंसाराहितं यज्ञमेव देवानां प्रीतिकरं भवति।

5. **सन्दर्भः**

अग्निः सर्वैः देवैस्सह यज्ञशालायां आगच्छतु।

**अग्निर्होता कविक्रतुः सत्यश्चित्रश्रवस्तमः।**

**देवो देवेभिरागमत्।।**

**अन्वयः  अर्थश्च**

| | | |
|---|---|---|
| कविक्रतुः | - | क्रान्तप्रज्ञः, अनृतरहितः |
| होता | - | होमनिष्पादकः |
| चित्रश्रवस्तमः | - | विविधकीर्तियुक्तः |
| देवः अग्निः | - | दीव्यमानोग्निः |
| देवेभिः आगमत् | - | देवैस्सहागच्छतु। |

**भावार्थः**

शोभायमानः अग्निः, यः होमोत्पादकः अत्यधिकं प्रज्ञावान्, सत्यस्वभावयुक्तः सर्वथा यशस्वी च भवति, सः इतरैर्देवैस्सह अस्य यजमानस्य यज्ञशालायां आगच्छतु।

६. **सन्दर्भः**

अग्निः हविर्दात्रे यजमानाय सर्वथा कल्याणकारी भवति।

**यदङ्ग दाशुषे त्वमग्ने भद्रं करिष्यसि।**

**तवेत्तत् सत्यमङ्गिरः।।**

**अन्वयः अर्थश्च**

| | | |
|---|---|---|
| हे अङ्ग अग्ने त्वं | - | अभिमुखाग्ने त्वं |
| दाशुषे यत्भद्रं करिष्यसि | - | हविर्दत्तवते यजमानाय यत् कल्याणं विदधासि |
| तत् तव इत् | - | तत्तवैव |
| हे अङ्गिर (एतत्)सत्यम् | - | अग्ने तदविसंवादम्। |

**भावार्थः**

अभिमुख, ऊर्ध्वज्वलनशील, हे अग्ने त्वं हविर्दात्रे यजमानाय यं कल्याणमाचरसि तत् त्वत्सदृशानां कारुण्यवतां कृते उचितमाचरणं भवति इति सत्यमेव। अस्याचरणस्य फलं यज्ञेषु हविरादानरूपेण त्वं स्वीकरोषि।

७. **सन्दर्भः**

यज्ञानुष्ठातारः सर्वदा अग्निमेवाश्रयन्ते।

**उपत्वाग्ने दिवे दिवे दोषावस्तर्धिया वयम्।**

**नमो भरन्त एमसि।।**

**अन्वयः अर्थश्च**

| | | |
|---|---|---|
| हे अग्ने वयं | - | अनुष्ठातारः |
| दिवे दिवे दोषावस्तः | - | प्रतिदिनं रात्रावहनि च |
| धिया नमः भरन्तः | - | बुद्ध्या नमस्कारं सम्पादयन्तः |
| उप त्वा आ इमसि | - | समीपे त्वामागच्छामः। |

**भावार्थः।**

हे अग्ने यज्ञानुष्ठातारो वयं प्रतिदिनं अहर्निशं धिषणया नमस्कुर्वाणः भवतः सकाशं आगच्छामः तथा भवन्तमाश्रयामः।

**सन्दर्भः**

विविधविशेणषयुक्तः अग्निः उपासकानां आश्रयदाता भवति।

**राजन्तमध्वराणां गोपामृतस्य दीदिविम्।**

**वर्धमानं स्वे दमे।।**

**अन्वयः अर्थश्च।।**

| | | |
|---|---|---|
| राजन्तं अध्वराणां गोपां | - | दीप्यमानं यज्ञानां रक्षकं |
| ऋतस्य दीदिविम् | - | सत्यस्य द्योतकं |
| स्वे दमे वर्धमानं | - | स्वीये यज्ञशालायां हविर्भिः प्रोज्वलन्तं त्वामपैमः। |

**भावार्थः**

शोभायमानं, यज्ञरक्षकं, सत्यप्रकाशस्वरूपं स्वकीयायां यज्ञशालायां हवनद्रव्यैः जाज्वल्यमानं त्वां वयमाश्रयामः।।

**9. सन्दर्भः**

पुत्राणां कृते जनक इव अग्निः उपासकानां सर्वदा कल्याणकारी तथा अनुग्रहदायकश्च भवति।

**सनः पितेव सूनवेग्ने सूपायनो भव।**

**सचस्वानः स्वस्तये।।**

**अन्वयः अर्थश्च**

| | | |
|---|---|---|
| हे अग्ने सः (त्वं) नः | - | अस्मदर्थं |
| सूनवे पिता इव | - | पुत्रार्थं जनक इव |
| सु उपायनः भवा | - | शोभनप्राप्तियुक्तो भव |
| नः स्वस्तये सचस्व | - | अस्माकं विनाशराहित्यार्थं समवेतों भव।। |

**भावार्थः**

यथा पुत्रार्थं पिता सुकरेण प्राप्तुं योग्यो भवति तथा है अग्ने अस्माकं हितैषी भवानपि अस्मदर्थं सुप्राप्यो भव, अस्मत्कल्याणार्थं सर्वदा भवदनुग्रहं अस्माकमुपरि वर्षतु।

## इति अग्निसुक्तं समाप्तम्

# इन्द्रसूक्त् - 2 - 6 - 7

## 1. सन्दर्भः

ऋग्वेदस्य द्वितीये मण्डले विद्यमानमिदं सूक्तम्। अस्य सुक्तस्य उपोद्घातरूपेण एका कथा अस्ति। एकदा वैन्यस्य यज्ञे इन्द्रादिदेवाः समागतवन्तः। यज्ञशालायां गृत्समदोऽप्यासीत् तत्समये इन्द्रं हन्तुं धुनि चमूरू इति द्वावसुरौ स्वानुचरैस्सह समागतवन्तौ। तदा इन्द्रः गृत्समदस्य रूपं धृत्वा कुत्रापि अप्रत्यक्षोऽभूत्। गृत्समदोऽपि यज्ञशालायाः बहिराजगाम। गृत्समदं दृष्ट्वा स वेषप्रच्छन्न इन्द्र इति मत्वा असुराः तस्य वधाय उद्युक्ताः। तदा तान् असुरान् प्रति गुत्समदस्य उक्तिरेव इदं सुक्तम्। सूक्तस्यास्य द्रष्टा ऋषिः शौनको गृत्समदः, छन्दः त्रिष्टुप् तथा देवता इन्द्रश्च भवति। ''नाहमिन्द्रः, अल्पज्ञोऽहं इन्द्रो विविधगुणसम्पन्नः खलु'' इत्यादिभिः वचनैः गृत्समदः इन्द्रस्य माहात्म्यं उदघोषयति।

**यो जात एव प्रथमो मनस्वान्**
**देवो देवान् क्रतुना पर्यभूषत्।**
**यस्य शुष्माद्रोदसी अभ्यसेतां**
**नृम्णस्य महना स जनास इन्द्रः।।**

**अन्वयः अर्थश्च**

(गृत्समदो ब्रूते)

| | | |
|---|---|---|
| हे जनासः | - | जनाः असुराः |
| यः जात एव | - | जायमान एव सन् |
| प्रथमः | - | देवानां प्रधानभूतः |
| मनस्वान् | - | मनस्विनामग्रगण्यः |
| देवः | - | दीप्यामानः सन् |
| क्रतुना | - | वृत्रवधादिना कर्मणा |
| देवान् परि अभूषत् | - | सर्वान् यागदेवान् रक्षकत्वेन पर्यग्रहीत् |
| यस्य शुष्मात् | - | शरीरात् बलात् |
| रोदसी अभ्यसेतां | - | द्यावापृथिव्यौ अबीभितां |
| नृम्णस्य मह्ना | - | सेना लक्षणस्य बलस्य महत्वेन युक्तः |
| सः इन्द्र | - | नाहम्। |

**भावार्थः**

गृत्समद उवाच हे जनाः, दानवाः, यः जनिं लब्ध्वा एव देवेषु प्रधानभूतोऽभवत् । स एव मनस्विनामग्रगण्यः, अपूर्वतेजोयुक्तः वृत्रवधादिभिः वीरकर्मभिः सर्वेषु देवेषु वरिष्ठोऽभूत् तथा सर्वेषां देवानां रक्षकश्च, द्यावापृथिव्यौ यस्य भुजबलात् बिम्यतः विपुलसेनायुक्तः स एव इन्द्रः नाहम्।

**2. सन्दर्भः**

प्राकृतिकशक्तीनामुपरि इन्द्रस्य आधिपत्यं अस्मिन् श्लोके वर्णितम्।

**यः पृथिवीं व्यथमानामदृंहत्**

**यः पर्वतान् प्रकुपिताँ अरम्णात्।**

**यः अन्तरिक्षं विममे वरियो**

**योद्यामस्तभ्नात् सजनास इन्द्रः।।**

**अन्वय अर्थश्च**

| | | |
|---|---|---|
| (हे) जनासः यः | - | जनाः असुराः य इन्द्रः |
| व्यथमानां पृथिवीं | - | चलन्तीं भूमिं |
| अदृंहत् | - | शर्करादिभिः दृढामकरोत् |
| यः प्रकुपितान् | - | इतस्ततश्चलितान् पक्षयुक्तान् |
| पर्वतान् अरम्णात् | - | नियमितवान्, स्वेस्वेस्थाने स्थापितवान् |
| यः वरीयः | - | उरुतमं |
| अन्तरिक्षं विममे | - | निर्ममे, विस्तीर्णं चकार |
| यः (च) द्यां अस्तभ्नात् | - | तस्तम्भ, निरुद्धामकरोत् |
| स इन्द्रः | - | (नाहम्) । |

**भावार्थः**

असुरान् प्रति गृत्समदस्य इयमुक्तिः हे असुराः, अमितभरिण यः इतस्ततः प्रकम्पयन्तीं भूमिं कटुशर्करादिभिः सुदृढामकरोत्, चः इतस्ततः सञ्चरतः जनोपद्रवकारिणः पक्षयुक्तान् वर्वतान स्वे स्वेस्थाने स्थापितवान्, तथा चः विपुलं अन्तरिक्षं निर्माय तं पुनः विस्तृतं चकार, यः आकाशं निश्चलीकृतवान् स एव इन्द्रः नाहम्।

**3. सन्दर्भः**

इन्द्रस्य वर्षाकारकत्वं तथा इन्द्रेण कृतं वलनाशनञ्च विवृणोति।

**यो हत्वाहिमरिणात् सप्तसिन्धून्**

**यो गा उदाजदपद्या वलस्य।**

**यो अश्मनोरन्तरग्निं जजान**

**संवृक् समत्सु सजनास इन्द्रः।।**

**अन्वयः अर्थश्च**

| | | |
|---|---|---|
| हे जनासः | - | जनाः असुराः |
| यः अहिं हत्वा | - | मेघं हत्वा |

| | | |
|---|---|---|
| सप्तसिन्धून् | - | सर्पणशीलाः स्यन्दनशीलाः अपः गङ्गाद्याः सप्तनद्यो वा |
| अरिणात् | - | प्रैरयत |
| यः वलस्य | - | तन्नामकस्यासुरस्य |
| अपधाः | - | तेन निरुद्धाः |
| गाः उत् आजत् | - | निरगमयत् |
| यः अश्मनोः | - | अश्नुते व्याप्नोत्यन्तरिक्षमिति अश्म मेघः, मेघयोः |
| अन्तः अग्निं जजान | - | मध्ये वैद्युदाग्निमुत्पादयामास |
| पश्च समत्सु | - | सङ्ग्रामेषु |

संवृक् - हिंसकः (भवति) स इन्द्रः (नाहम्)

**भावार्थः**

गृत्समदो वदति, हे असुराः यः मेघं भित्वा प्रवहमानान् जलान् अथवा सप्तनदीः मुमोच, यः वलनामकेनासुरेण निरुद्धाः गाः वहिरानीतवान्, यः मेघान्तर्भागे वैद्युताग्निं प्राज्वलत्, यः युद्धेषु शत्रुहन्ता च भवति स एव इन्द्रः (नाहम्)

**4. सन्दर्भः**

इन्द्रः विश्वे विद्यमानान् दुर्जनान् संहृत्य विश्वे शान्ति संस्थापयतीति वदति।

**येनेमा विश्वा च्यवना कृतानि**
**यो दासं वर्णमधरं गुहाकः।**
**श्वघ्नीव यो जिगीवान् लक्षमादत्**
**अर्यः पुष्टानि स जनास इन्द्रः।।**

**अन्वय अर्थश्च**

| | | |
|---|---|---|
| हे जनासः | - | जनाः असुराः |
| येन इमा विश्वा | - | इमानि सर्वाणि विश्वानि |
| च्यवना कृतानि | - | नश्वराणि भुवनानि स्थिरीकृतानि |
| यः दासं वर्णं | - | नीचजातिजातं अपक्षयितारं वा |
| अधरं | - | निकृष्टमसुरं |
| गुहा अकः | - | गुहायां, निगूढस्थाने नरके वा अकार्षीत् |
| यः लक्षं जिगीवान् | - | लक्ष्यं जितवान् |
| श्वघ्नी इव | - | श्वभिः मृगान् हन्तीति श्वघ्नी व्याधः |
| (य) अर्यः | - | अरेः शत्रोः सम्बन्धीनि |
| पुष्टानि आदत् | - | समृद्धानि आदन्ते (यथा व्याधः जिघृक्षितं मृगं परिगृह्णाति, तद्वत्) |

स इन्द्रः

**भावार्थः**

हे असुराः विश्वे दृश्यमानानि  समग्रभूतजातानि नश्वराणि  वस्तूनि येन स्थिरीकृतानि अर्थात् स्वे स्वे विषये यथाविधि नियुक्तानि, यः नीचजन्मानं सज्जनकण्टकं निकृष्टासुरं निगूढस्थाने अर्थात् नरके पातयामास, यः स्वकीयं लक्ष्यं सर्वदा पूर्तीकरोति, यः प्रतियोगिनां सर्वैश्वर्यान्  आखेटविहारी व्याधः मृगान् इव स्ववशं करोति स इन्द्र) नाहम्

**5. सन्दर्भः।**

इन्द्रस्य अस्तित्वविषये शङ्का न कार्य। इति गृत्समदो वदति।

**यं स्मा पृच्छन्ति कुहसेति घोर-**
**मुतेमाहुर्नैषो अस्तीत्येनम्।।**
**सो अर्यः पुष्टीर्विज इवामिनाति**
**श्रदस्मै धत्त स जनास इन्द्रः।।**

**अन्वयः अर्थश्च**

| | | |
|---|---|---|
| जनासः | - | अपश्यन्तो जनाः असुराः |
| उत घोरं यं | - | अपि च शत्रूणां घातकं यमिन्द्रं |
| 'कुह स' इति पृच्छन्ति स्म | - | स इन्द्रः कुत्र वर्तते इति (न क्वचिदपि तिष्ठतीति मन्यमाना जनाः) |
| 'एष न अस्ति' इति एनमाहूः | - | इन्द्रं प्रत्याहुः |
| सई विज इव | - | (इव शब्दः एवार्थे) उद्वेजक एव सन् |
| अर्यः | - | अरेः शत्रोः सम्बन्धीनि |
| पुष्टीः | - | पोषकानि गवाश्वादीनि धनानि |
| आमिनाति | - | सर्वतो हिनस्ति |
| (तस्मात्) श्रत् अस्मै धत्त | - | स इन्द्रः अस्तीति विश्वासं कुरुत (यद्यप्यसौ विशेषतः अस्माभिर्न दृश्यते तथापि अस्तीति विश्वासं कुरुत) |
| स इन्द्रः | - | (नाहम) |

**भावार्थ**

अथ इन्द्रमपश्यन्तः असुराः शत्रुहन्तारं तमुद्दिश्य 'स कुत्रास्ति' इति पृच्छमानः अर्थात् इन्द्रः कुत्रापि नास्ति' इति विचार्यमाणः असुराः ''सः नास्तीति'' भवन्तमुद्दिश्य वदन्ति। भवान् तु उग्रप्रतापशाली भूत्वा शत्रूणां समृद्धिं, धेन्वश्वादीनि सर्वविधानि धनानि नाशयति। अतः हे दानवाः इन्द्रः अस्तीति विश्वासं कुरुत। स इन्द्रः नाहमस्मि। (अनेन मन्त्रेण अदृश्यो भूत्वापि ईश्वरोऽस्तीति निरीश्वरवादिनं प्रति घोषणा ध्वन्यते।

**6. सन्दर्भः**

इन्द्रस्य दानशीलं साधुसंरक्षणशीलं च अस्मिन् मन्त्रे विवृणोति

यो रध्रस्य चोदिता यः कृशस्य

यो ब्रह्मणो नाधमानस्य कीरेः।

युक्तग्राव्णो यो ढविता सुशिप्रः

सुतसोमस्य स जनास इन्द्रः।

**अन्वयः अर्थश्च**

| | | |
|---|---|---|
| हे जनासः | - | जनाः असुराः |
| यः रध्रस्य | - | समृद्धस्य, धनानां |
| चोदिता | - | प्रेरयिता (भवति) |
| यः कृशस्य | - | दरिद्रस्य च |
| यः नाधमानस्य कीरेः | - | याचमानस्य कीर्तयतेः स्तोतुश्च |
| ब्रहमणः | - | ब्राहमणस्य च धनानं प्रेरपिता |
| यःसुशिप्र | - | शोभन हनुस्सन् |
| युक्तग्राव्णः | - | अभिषवार्थमुद्यतग्राव्णः |
| सुतसोमस्या | - | अभिषुतसोमस्य यजनामस्य |
| अविता | – | रक्षिता (भवति) |
| स इन्द्राः | - | (नाहम) |

**भावार्थः**

गृत्मनदो ब्रूते हे दानवाः यः धनधान्यादिसम्पदां प्रेरयिता, यश्च विद्यासंस्कारादिगुणविशेषैः सम्पन्नं पुरुषं धनधान्यादिभि पुष्टिं प्रापयति, यः दरिद्रेभ्यः अपि प्रभूतं धनं प्रयच्छति, अर्थिभ्यः स्तोतृभ्यश्च ब्राह्मणेभ्यः प्रभूतं धनं ददाति, यः शोभनहनुस्सन् यज्ञे सोमलतायाः शुद्धिकरणार्थं गृहीतपाषाणस्य शुद्धिकृतसोमरसस्य च यजमानस्य रक्षिता भवति स एव इन्द्रः

**7. सन्दर्भः**

इन्द्रस्य सर्वलोकनियन्तृत्वं अस्मिन् मन्त्रे विवृणोति।

**यस्याश्वासः प्रदिशि यस्य गावो**

**यस्य ग्रामा यस्य विश्वे रथासः।**

**यः सूर्यं य उषसं जजान**

**यो अपां नेता सजनास इन्द्रः।।**

**अन्वयः अर्थश्च**

| | | |
|---|---|---|
| हे जनासः | - | जना असुराः |
| यस्य | - | सर्वान्तर्यामितया वर्तमानस्य |
| प्रदिशि | - | प्रदेशने अनुशासने |
| अश्वासः | - | अश्वाःवर्तन्ते |
| यस्य गावः | - | अनुशासने वर्तन्ते |
| यस्य ग्रामाः | - | जनपदाः अनुशासने वर्तन्ते |
| यस्य विश्वे रथासः | - | सर्वे रथाः अज्ञायां वर्तन्ते |
| यः सूर्यं जजान | - | वृत्रं हत्वा जनयामास, अनावृतवान् |
| यः उषसं | - | जनयामास |
| यः अपां नेता | - | मेधभेदनद्वारा प्रेरकः |
| स इन्द्रः | - | (नाहम्) |

**भावार्थः**

मां इन्द्रं मन्यमानाः हे दानवाः सर्वान्तर्यामिनो यस्य अनुशासनाधीना भवन्ति अश्वाः, गावः यमनुवर्तन्ते, यस्यानुशासने जनपदाः ग्रामाश्च वृद्धिं प्राप्नुवन्ति, यस्प नियन्त्रणे सर्वे रथाः चलन्ति, यः वृत्रं (मेघं) हत्वा सूर्यमनाच्छादितवान्, यः उषसमुत्पादयामास, यः मेघं भित्वा मूमौ जलं वर्षयति स एव इन्द्रः नाहम्।

**8. सन्दर्भः**

द्यावापृथिव्यौ, अग्निः सोमः तथा शत्रवश्च प्राणरक्षार्थं इन्द्रं आह्वयन्ते।

**यं क्रन्दसी संयती विह्वयेते**
**परेऽवर उभया अमित्राः।**
**समानञ्चिद्रथमातस्थिवांसा**
**नाना हवेते स जनास इन्द्रः।।**

**अन्वयः अर्थश्च**

| | | |
|---|---|---|
| हे जनासः | - | जनाः असुराः |
| यं क्रन्दसी | - | शब्दं कुर्वाणे द्यावापृथिव्यौ |
| संयती | - | परस्परं संगच्छन्त्यौ |
| विह्वयेते | - | स्वरक्षार्थं विविधमाह्वयत |
| परे अवरे | - | उत्कृष्टा अधमाश्च |
| उभयाः अमित्राः | - | उभयविधाः शत्रवः यमाह्वयन्ति |
| समानञ्चिद्रथं | - | इन्द्रसदृशमेव रथं |

| | | |
|---|---|---|
| आतस्थिवांसा | - | आस्थितौ द्वौ रथिनौ तमेवेन्द्रं |
| नाना हवेते | - | पृथक् पृथक् आह्वयते |
| स इन्द्रः | - | (नाहम) |

**भावार्थः**

हे जनाः असुराः शब्दं कुर्वत्यौ द्यावापृथिव्यौ मिथः मिलित्वा स्वरक्षार्थं विभिन्नैः स्तुतिगीतैः यमाह्वयत्यौ, बलशालिनः दुर्बलाश्च शत्रवः प्राणरक्षार्थं यमाह्वयन्ति, इन्द्रस्य सर्वलक्षणसुघटिते रथे स्थित्वा द्वौ सारथिनौ (अग्निः सोमश्च) पृथक् पृथक् यं विविधैः स्तवैः आह्वयतः स एव इन्द्रः नाहम्।

**9. सन्दर्भः**

योद्धारः स्वविजयार्थं इन्द्रमेव प्रार्थयन्ते

**यस्मान्न ऋते विजयन्ते जनासो**
**यं युद्ध्यमाना अवसे हवन्ते।**
**यो विश्वस्य प्रतिमानं बभूव**
**यो अच्युतच्युत् स जनास इन्द्रः।।**

**अन्वयः अर्थश्च**

| | | |
|---|---|---|
| जनासः | - | हे जनाः असुराः |
| यस्मात् ऋते जनासः | - | येन विना जनाः |
| न विजयन्ते | - | विजयं न प्राप्नुवन्ति |
| (अतः) युध्यमानाः (जनासः) | - | युद्धं कुर्वाणः जनः |
| अवसे यं हवन्ते | - | स्वरक्षणाय आह्वयन्ति |
| यः विश्वस्य | - | सर्वस्य जगतः |
| प्रतिमानं बभूव | - | प्रतिनिधिरभवत् |
| यःअच्युतच्युत् | - | अच्युतानं क्षयरहितानां पर्वतादीनां च्यावयिता च |
| स इन्द्रः | - | (नाहम्) |

**भावार्थः**

इन्द्रस्य पराक्रमं गृत्समदो वर्णयाति। हे असुराः यं विना योद्धारः युद्धेषु विजयं न प्रप्नुवन्ति तस्मादेव कारणात् युद्धाय कृतनिश्चयाः, योद्धारः स्वराक्षायै यं प्रार्थयन्ति यः सर्वेषां जगतां प्रतिनिधिर्भवति, यः बलिष्ठानां अचलानामपि पर्वतानां उत्तोलनं करोति अथवा बलवन्तं, वीर्यवन्तं, भाग्यशालिनं, अपराजितमपि द्विषदं पराजयकोटिं प्रापयति स एव इन्द्रः नाहम्।

**10. सन्दर्भः**

इन्द्रस्य तिरस्कारं ये कुर्वन्ति तेषां कृते इन्द्रः कदापि न साहाय्यमाचरति।

**यश्शश्वतो मह्येनो दधानान्**

**अमन्यमानाञ्छर्वा जघान।**

**यश्शर्धते नानुददाति शृद्ध्यां**

**यो दस्योर्हन्ता स जनास इन्द्रः।।**

**अन्वयः अर्थश्च**

| | | |
|---|---|---|
| जनासः | - | जना असुराः |
| यः महि एनः दधानान् | - | महत् पापं कृतवतः |
| शश्वतः अमन्यमानान् | - | बहून आत्मानमजानतः इन्द्रमपूजयतो जनान् |
| शर्वा जधान | - | शरुर्वज्रः तेनायुधेन हतवान् |
| यः शर्धते | - | उत्साहं कुर्वते अनात्मज्ञाय जनाय |
| श्रृद्ध्यां | - | उत्साहनीयं कर्म |
| न अनुददाति | - | न प्रयच्छति |
| यः दस्योः हन्ता | - | उपक्षयितुः शत्रोः घातकः |
| स इन्द्रः | | (नाहम्) |

**भावार्थ**

हे जनाः असुराः निरन्तरं विविधप्रकाराणि महापापानि कुर्वाणः, इन्द्रं अजानतः अथवा ईश्वरमपूजयतः बहून् जनान् यः वज्रायुधेन जघान, इन्द्रमज्ञात्वा, इन्द्रे विश्वासमकृत्वा यः मदोन्मत्तो गर्विष्ठः इन्द्रं अवधीरयति तस्मै सुखसंवर्धकं कर्म कदापि यो न ददाति, यः परोपद्रवकारिणां शत्रूणां हन्ता भवति स इन्द्रः नाहम्।

11. इन्द्रस्य शम्बरवधवृत्तान्तं वर्णयति-

**यश्शम्बरं पर्वतेषु क्षियन्तं**

**चत्वरिंश्यां शरद्यन्वविन्दत्।**

**ओजायमानं यो अहिं जघान**

**दानुं शयानं स जनास इन्द्रः।।**

**अन्वयः अर्थश्च**

| | | |
|---|---|---|
| जनासः | - | जनाः असुराः |
| यः पर्वतेषु क्षियन्तं | - | इन्द्रभिया बहून् संवत्सरान् प्रच्छन्नो भूत्वा पर्वतगुहासु निवसन्तं |
| शम्बरं | - | एतन्नामकमसुरं |
| चत्वारिंश्यां शरदि | - | चत्वारिंशे संवत्सरे |

| | | |
|---|---|---|
| अनु अविन्दत् | - | अन्विष्यालभत |
| (लब्ध्वा च) यःओजायमानं | - | बलमाचरन्तं |
| अहिं दानुं | - | आहन्तारं दानवं |
| शयानं जघान | - | हतवान् |
| स इन्द्र | - | नाहम् |

**भावार्थः**

हे दानवाः यः शम्बरो नाम असुरः इन्द्रभयात् बहून् संवत्सरान् यावत् वेषप्रच्छन्नो भूत्वा पर्वतगुहासु निवसन्नासीत्। चत्वारिंशत्तमे वर्षे अन्विष्य बलशालिनं सज्जनहन्तारं तं दानवं शयनावस्थायां यः हतवान् स एव इन्द्रः।

**12. सन्दर्भ**

इन्द्रस्य वृष्टिकारकत्वं उक्त्यन्तरेण वर्णयति।

यः सप्तरश्मिर्वृषभस्तुविष्मान्
अवासृजत् सर्तवे सप्तासिन्धून्।
यो रौहिणमस्फुरद्वज्रबाहुः
द्यामारोहन्तं स जनास इन्द्रः।।

**अन्वयः अर्थश्च**

| | | |
|---|---|---|
| जनासः | - | जनाः असुराः |
| यः सप्तरश्मिः | - | सप्तसंख्याकाः रश्मयः पर्जन्याः यस्य सः |
| वृषभः तुविष्मान् | - | वर्षकः वृद्धिमान् |
| सप्तसिन्धून् | - | सर्पणस्वभावा अपः, गंगाद्या नदीः (द्वितीया बहु.) |
| सर्तवे अव असृजत् | - | सरणाय असृजत् |
| यः वज्रबाहुः | - | वज्रायुधः सन् |
| द्यामारोहन्तं रौहिणं | - | दिवमारोहन्तं असुरं |
| अस्फुरत् | - | जघान |
| स इन्द्रः | - | (नाहम्) |

**भावार्थः**

असुरान् प्रति गृत्समदस्येयमुक्तिः। हे दानवाः यः सप्तप्रकारैः पर्जन्यैः (मेघैः) सहितः, (वराहुः, स्वतपा, विद्युत्, महः धूपी, श्वापी, गृहमेधाः इति सप्तपर्जन्याः) यः वृष्टेः कारणभूतः अत एव वृद्धिमान् भूत्वा प्रवहमानानि जलानि अर्थात् गंगाद्याः सप्तनदीः निर्ममे, यः वज्रं धृत्वा आकाशं प्रत्युत्पतन्तं रौहिणं नामकमसुरं हतवान् स इन्द्रः नाहम्।

**13. सन्द्रर्भ**

इन्द्रस्य भुजवलस्य पुरतः सर्वे भयचकिता भूत्वा नमस्कुर्वन्ति।

**द्यावाचिदस्मै पृथिवी नमेते**
**शुष्माच्चिदस्य पर्वता भयन्ते।**
**यः सोमपा निचितो वज्रबाहुः**
**यो वज्रहस्तस्सजनास इन्द्रः।।**

**अन्वयः अर्थश्च**

| | | |
|---|---|---|
| जनासः | - | जनः असुराः |
| अस्मै द्यावापृथिवी | - | (इतरेतरापेक्षया द्विवचनं) इन्द्राय |
| नमेते | - | स्वयमेव प्रह्वीभवतः |
| चित् अस्य | - | अपि च इन्द्रस्य |
| शुष्मात् पर्वताः चित् भयन्ते | - | बलात् पर्वता अपि बिभ्यन्ति |
| यः सोमपाः | - | सोमस्य पाता |
| निचितः | - | अन्येभ्योपि देवेभ्यो दृढाङ्गः |
| वज्रबाहुः | - | वज्रसदृशबाहुः |
| यः वज्रहस्त | - | वज्रयुक्तश्च |
| स इन्द्रः | - | नाहम् |

**भावार्थः**

हे दानवाः अस्य इन्द्रस्य पुरतः आकाशः पृथिवी च स्वकीयं नमस्कारं समर्पयतः। अपि च कठोरा पर्वता अपि इन्द्रस्य प्रभावात् बिभ्यन्ति। सोमपानशीलो यो देवः बले इतरान् देवानतिशेते। वज्रसदृशहस्तयुक्तः वज्रपाणिश्च भवति स इन्द्रः नाहम्।

**14. सन्दर्भः**

इन्द्रः कीदृशान् जनान् रक्षति इति वदति

**यः सुन्वन्तभवति यः पचन्तं**
**यः शंसन्तं यः शशमानमूती।**
**यस्य ब्रह्म वर्धनं यस्य सोमो**
**यस्येदं राधः स जनास इन्द्रः।।**

**अन्वयः अर्थश्च**

| | | |
|---|---|---|
| जनासः | - | जनाः असुराः |
| यः सुन्वन्तं अवति | - | सोमाभिषवं कुर्वाणं रक्षति |
| यः ऊती शंसन्तं | - | ऊतये स्वरक्षायै स्तुवन्तं (रक्षति) |
| यः शशमानं | - | स्तोत्रं कुर्वाणं (रक्षति) |
| ब्रह्म यस्य वर्धनं | - | परिवृढं स्तोत्रं वृद्धिकरं भवति |

| | | |
|---|---|---|
| यस्य सोमः | - | वृद्विहेतुर्भवति |
| यस्य इदं राधः | - | अस्मदीयं पुरोडाशादिलक्षणमन्नं वृद्धिकरं भवति |
| सः इन्द्रः | - | नाहम् |

**भावार्थः**

इन्द्रस्य आश्रितवत्सलत्वं आस्मिन् मन्त्रे दृष्टुं शक्यते। यः यजमानः सोमलतां पिष्ट्वा इन्द्राय सोमरसं अर्पयति तं यजमानं यः रक्षति, यश्च पुरोडाशादि हवींषि पचन्तं यजमानं रक्षति स्वरक्षार्थं स्तुवन्तं मानवं यः रक्षति, यः स्तुतिगीतानि कुर्वन्तं स्तोत्रकर्तारं रक्षति, महत्तरं स्तोत्रं यस्य वृद्धिकरं भवति, यस्यकृते सोमरसः पुष्टिकरो भवति, यस्य वृद्धये पुरोडाशादीनि हवींषि प्रेरकाणि भवन्ति स एव इन्द्रः नाहम्।

**सन्दर्भः**

असुरान् प्रति एवं इन्द्रस्य गुणगाणन् सम्यक् प्रशंस्य पुनः गृत्समदः इन्द्रं प्रशशंस।

यस्सुन्वते पचते दुध्र आचित्
वाजं दर्दर्षि स किलासि सत्यः।
वयं त इन्द्र विश्वह प्रियासः
सुवीरासो विदथमावदेम।

**अन्वयः अर्थश्च**

| | | |
|---|---|---|
| हे इन्द्र, यः दुध्रः | - | दुर्धरः सन् |
| सुन्वते | - | सोमाभिषवं कुर्वते |
| (पुरोडाशादि हवींषि)पचते चित | - | पाकं कुर्वते यजमानाय अपि |
| वाजं आ दर्दर्षि | - | अन्नं (बलं) भृशं प्रापयति |
| (सः त्वं)सत्यः असि किल | - | यथार्थभूतः, न पुनर्नास्तिति बुद्धियोग्योऽसि |
| ते प्रियासः सुवीरामः | - | कल्याणपुत्रपौत्रास्सन्तः |
| वयं विश्वह | - | सर्वेष्वहस्सु |
| विदथं आवदेम | - | स्तोत्रं ब्रूयाम। |

**भावार्थः**

इन्द्रस्य गुणगणान् सुष्ठु प्रशंस्य गृत्समदः पुनरिन्द्रं अभिसम्बोधनं कृत्वा एवं स्तौति। हे इन्द्र, यः सर्वैः अनभिगम्यः अपराजितः तथा अवधारणातीतश्च सन् सोमलतां पिष्ट्वा सोमरसं, पुरोडाशीदीनि हवींर्षि च पचते यजमानाय प्रभूतमन्नं ददाति तादुशो भवान् परमार्थसत्यस्वरूपो भवति। विश्वे भवतो ऽन्यः कोपि ध्यानयोग्यो नास्तीति सुविदितमेव। भवतां प्रियतमा वयं सत्पुत्रपौत्रादिभिस्सह चिरकालपर्यन्तं भवतां स्तोत्रमालपामः।।

**इतीन्द्रसूक्तं समाप्तम्**

# उषस्सूक्तम्

## 1. सन्दर्भः

इदमुषस्सूक्तं ऋग्वेदस्य चतुर्थे मण्डले एकपञ्चाशत्तमं सूक्तं भवति, तथा तृतीयाष्टकस्य अष्टमाध्यायस्य प्रथमद्धितीययोः वर्गयोः उषःसुक्तं प्रतिपादितम्। सूक्तस्यास्य द्रष्टा ऋषिः वामदेवः छन्दः त्रिष्टुप्, उषो देवता च भवति। प्रथमे मन्त्रे सुर्यरश्मिरूपा उषसः पूर्वस्यां दिशि प्रकाशं विसार्य जनान् स्वस्वकर्मानुष्ठाने नियोजयति इति वर्णितम्

**इदमुत्यत् पुरुतमं पुरस्तात्**
**ज्योतिस्तमसो वयुनावदस्थात्।**
**नूनं दिवो दुहितरो विभातीः**
**गातुं कृणवन्नुषसो जनाय।।**

**अन्वयः अर्थश्च**

| | | |
|---|---|---|
| इदं उ | - | पुरतो दृश्यमानमिदमेव |
| त्यत् पुरुतमं ज्योतिः | - | तत् प्रसिद्धं अत्यन्तं प्रभूतं तेजः |
| वयुनवत् पुरस्तात् | - | प्रकृष्टकान्तिमत पूर्वस्याँ दिशि |
| तमसः अस्थात् | - | तत्सकाशादुदतिष्ठत् |
| (एवं सति) नूनं दिवः दुहितरः) | - | सत्यमादित्यस्य दुहितृस्थानीयाः |
| विभातीः उषसः | - | विभानं कुर्वतीः उषसः |
| जनाय गातुं | - | गमनादिव्यापारसामर्थ्यं |
| कृणवन् | - | अकुर्वन्। |

**भावार्थः**

पुरो दुश्यानं अत्यन्तं प्रिसद्धं जाज्वल्यमानञ्च इदं तेजः अन्धकारमपावृत्य प्रकृष्टशोभया पूर्वस्यां दिशि प्रादुर्बभूव। एवं भूते सति नूनं सूर्यस्य पुत्रीस्थानीयाः प्रकाशं प्रसार्यमाणा इमा उषसः गमनागमनादिस्वस्वकर्मानुष्ठाने जनान् नियोजयन्ति। सर्वे जनाः निद्रानन्तरं प्रभाते स्वस्वकर्माचरणं कुर्वन्तीत्यत्यर्थः।

## २. सन्दर्भः

एता उषसः पूर्वस्यां दिशि अन्धकारान्त्यं विज्ञापयन् प्रकाशयति।

**अस्थुरु चित्रा उषसः पुरस्ता-**
**न्मिता इव स्वरवोध्वरेषु।**
**व्यूव्रजस्य तमसो द्वारा**
**उच्छन्तीरव्रञ्छुचयः पावकाः।।**

**अन्वयः अर्थश्च**

| | | |
|---|---|---|
| चित्रा उषसः | - | चायनीया श्लाघनीयाः उषसः |
| पुरस्तात् | - | पूर्वस्यां दिशि |

अध्वरेषु मिता इव स्वरवःअस्थूः उ-खाता यूपा इव तिष्ठन्ति, व्याप्ताः।

| | | |
|---|---|---|
| (ताः) व्रजस्य तमसः द्वारा | - | वारकस्यान्धकारस्य द्वाराणि |
| वि उच्छन्तीः उ | - | विवासयन्त्य एव |
| शुचयः पावका अव्रन् | - | दीप्ताश्शोधिका व्यवृण्वन् |

**भावार्थः**

प्रशंसार्हाः श्लाघनीयाश्च ता उषसः पूर्वस्यां. दिशि यज्ञशालायां संस्थापिता यूपा इव तिष्ठन्ति। यथा यूपा यज्ञानां सूचका भवन्ति तथा (एता उषस रात्रेरवसानं विज्ञापयन्ति। ता उषसः प्रकाशंवत्य शुद्धिकारिण्यश्च भूत्वा सर्वासु दिक्षु परिलसन्ति।

**3. सन्दर्भः**

एता धनवत्यः उषसः यजमानान् यज्ञानुष्ठानार्थं उदबोधयन्ति।

उच्छान्तीरद्य चितयन्त भोजान्
राधोदेयायोषसो मघोनीः।
अचित्रे अन्तः पणयस्ससन्तु
अबुद्ध्यमानास्तमसो विमध्ये।।

**अन्वयः अर्थश्च**

| | | |
|---|---|---|
| अद्य उच्छन्तीः | - | अस्मिन् दिने तमो विवासयन्त्यः |
| मधोनीः उषसः | - | धनवत्यः उषसः |
| भोजान् | - | भोजयितृन् यजमानान् |
| (तेषां) राधः देयाय | - | सोमादिधनदानाय |
| अन्तः चितयन्त | - | प्रज्ञापयन्ति |
| अचित्रे तमसः विमध्ये | - | अयाचनीये अत्यन्तगाढ़ान्धकारे |
| पणयः अबुद्ध्यमानाः ससन्तुः | - | वणिजः अदातारः स्वपन्तु |

**भावार्थः**

अस्मिन् शुभे दिने अन्धकारनिवारणशीलाः धनवत्यश्च एता उषसः ,सोमहविरादीनं समर्पणाय अन्नदातृन् यजनामानान्

उदबोधयन्ति, अर्थात् प्रभाते यज्ञहवनादीन् कर्तुं जनान् - प्रेरयन्ति पणयः सर्वदा अन्धकारे एव स्वपन्तु। पणिशष्देन लुब्धाः, दानशीलरहिताः अमितलाभेच्छव इत्यादयो विवक्षितः। ते अलसा भूत्वा सूर्येदयवेलायामपि स्वपन्तु इत्यर्थः। सूर्योदयवेलायां निद्रा न कार्या इत्याशयः।

**4. सन्दर्भः**

एता उषसः नूतनेन पुरातनेन वा रथेन यागभूमौ आगच्छन्ति, अपि च यागस्य सञ्चालनमपि कुर्वन्ति।

**कुवित् स देविस्सनयो नवो वा**
**यामो बभूयादुषसो वो अद्य।**
**येना नवग्वे अङ्गिरे दशग्वे**
**सप्तास्ये रेवती रेवदूष ।।**

**अन्वयः अर्थश्च**

| | | |
|---|---|---|
| हे देवीः उषसः वः | - | युष्मान् |
| सनयः नवः वा | - | पुराणो नूतनो वा |
| यामः सः | - | गमनसाधनो रथः |
| अद्य कुवित् बभूयात् | - | अस्मिन् यागदिने बहुवारं भवेत् |
| येन हे रेवतीः | - | धनवत्यः यूयं |
| नवग्वे दशग्वे सप्तास्ये अङ्गिरे | - | सप्तच्छन्दोयुक्तमुखे अङ्गिरोगणे |
| रेवत् ऊष | - | धनवत यथा भवति तथा विभातं कृतवत्यः। |

**भावार्थः**

हे प्रकाशवत्य उषसः, पुरातनो नूतनो वा रथः युष्मान् यागदिने यागभूमावस्मिन् बहुवारं आनयन्तु। हे धनवत्यः अनेनैव रथेन यूयं अङ्गिरसां समूहे, ये नवग्वाः दशग्वाः गायत्री आदि सप्त छन्दोयुक्तमुखस्थिताश्च भवन्ति तेषां यागान् सफलान् कुरुथ। नवमासपर्यवसायिनं यागं ये कुर्वन्ति ते नवग्वाः, दशमास पर्यवसायिनं यागं ये कुर्वन्ति ते दशग्वाः।

**5. सन्दर्भः**

प्रकाशवत्य उषसः स्वपन्तं मनुष्यपश्वादिजीवजालं तथा प्रपञ्चे विद्यमानं भूतजालञ्च उदबोधयन्ति।

**यूयं हि देवीरृयुग्भिरश्वैः**
**परिप्रयाथ भुवनानि सद्यः।**
**प्रबोधयन्तीरुषसस्ससन्तं**
**द्विपाच्चतुष्पाच्चरथाय जीवम्।।**

**अन्वयः अर्थश्च**

| | | |
|---|---|---|
| हे देवीः उषसः यूयं हि | - | खलु |
| ऋतयुग्भिः अश्वैः | - | यज्ञगामिभिः अश्वैः |
| ससन्तं द्विपात् चतुष्पात् | - | स्वपन्तं मनुष्यगवादिलक्षणं |
| जीवं चरथाय | - | चरणाय, गमनादिव्यापाराय |

| | | |
|---|---|---|
| प्रबोधयन्तीः | - | प्रबोधयन्त्यः सत्यः |
| भुवनानि सद्यः परिप्रयाथ | - | भूतजातानि अद्यैव परितः प्रकृष्टं गच्छथ। |

**भावार्थः**

हे प्रकाशवत्य उषसः यूयं खलु यज्ञभूमावागच्छद्भिः अश्वैः सञ्चाल्यमानेन रथेनागत्य स्वपन्तं मनुष्यपश्वादिसकलजीवजालं स्वस्वकर्मानुष्ठाने प्रेरयथ। अपिच पञ्चभूतात्मकस्य प्रपञ्चस्यापि जागरणे ता उषसः कारणभूता भवन्ति।

**6. सन्दर्भः**

जीर्णरहिता एता उषसः नित्यनूतनस्वरूपिण्यो भूत्वा प्रपञ्चोत्पत्तिकालादारभ्य विराजन्ते।

**क्वस्विदासां कतमा पुराणी**
**यया विधाना विदधुरृभूणाम्।**
**शुभं यच्छुभ्रा उषसश्चरन्ति**
**न विज्ञायन्ते सदृशीरजुर्याः।।**

**अन्वयः अर्थश्च**

| | | |
|---|---|---|
| आसां क्वस्वित् | - | उषसां मध्ये |
| कतमा पुरणी | - | का पुरातनी अभूत् |
| यया ऋभूणां विधाना | - | चमसादि निर्माणानि |
| विदधुः | - | ऋंभवः अकुर्वन् |
| यत् उषस शुभ्राः शुभं चरन्ति | - | याश्च उषसः दीप्ताः शोभां कुर्वन्ति। |
| (ताः) अजुर्याः न विज्ञायन्ते | - | अशीर्णाः, नित्यनूतना इव प्रज्ञायन्ते |
| (यतः) सदृशीः | - | सदृश्यः एकरूपा भवन्ति, अतः एताः पुराण्यः इति न ज्ञायन्ते। |

**भावार्थः**

आसां उषसां मध्ये का पुरातनी भवति, यस्मिन्नुषसि ऋभवः चमसविभाजनमकुर्वन् या या उषसः प्रकाशवत्यो भूत्वा शोभन्ते ता उषसः अजीर्णा, नित्यनूतना इव विज्ञायन्ते। एताः सर्वाः उषसः एकरूपा भवन्ति तस्मात् ताः पुरातनी इति उत नूतनी इति कदापि न विज्ञायन्ते। चमस सोमपानार्थं उपयुज्यमानं पानपात्रं भवति। ऋभवः एव तच्चमसस्य विभाजनं सवैभ्य ऋत्विग्भ्यः कृते कुर्वन्ति.

**7. सन्दर्भः**

एता उषसः शस्त्ररूपां स्तुतिं कुर्वदभ्यः ऋत्विग्म्यः कृते
मङ्गलकारिण्यः धनप्रदायिन्यश्च भवन्ति।

**ता घाता भद्रा उषसः पुरासु-**
**रभिष्टिद्युम्ना ऋतजातसत्याः।**
**यास्वीजानः शशमान उक्थै-**
**स्तुवंञ्छंसं द्रविणं सद्य आप।।**

**अन्वयः अर्थश्च**

| | | |
|---|---|---|
| यासु ईजानः | - | उषस्सुयागं कुर्वाणः |
| उक्थैः शशमानः | - | शस्त्रैश्शंसमानः |
| स्तुवन्, शंसन् | - | सामभिः स्तोत्रं निष्पादयन्, शस्त्रामि कुर्वन् |
| द्राविणं सद्य आप | - | धनं क्षणेन प्राप्नोति |
| ताः घ भद्राः | - | अभवत् |
| ताः अभिष्टिद्युम्नाः | - | अभिगमनमात्रेण द्युम्नं, धनं यासां ताः |
| ऋतजातसत्याः | - | ऋतार्थं यज्ञार्थं जाताः सत्यफलाश्च |

**भावार्थः**

यासु यासु उषस्सु यज्ञानुष्ठाता, यज्ञेषु शस्त्रमन्त्रान् उच्चार्य साममन्त्रैः स्तुतिं कुर्वाणः पुनः पुनः शस्त्रस्तुतिं कुर्वाणः स्तोता उपासकः तत्क्षेणमेव धनं प्राप्नोति। कीर्तिमत्य उपकारिण्यश्च ता उषसः मङ्गलकारिण्यस्सन् प्राचीनकाले अवर्तयन्। ता उषस यागभूमावागमनमात्रेणैव उपासकेभ्यो धनं ददाति, अत एव ताः यज्ञार्यं प्रादुर्भूय सत्यफलवर्षका भवन्ति। उच्चैः तारस्वरेण उच्चार्यमाणाः एकस्वरात्मकाः स्तुतिमन्त्राः भवन्ति शस्त्रम्। शंसति इति शस्त्रम्

**8. सन्दर्भः**

प्रकाशवत्यः ता उषसः पूर्वस्यां दिशि प्रादुर्भूय तस्मात् सर्वत्र प्रकाशं प्रसारयन्ति, पुनस्ताः सर्वेषां स्तुतिपात्राणि भवन्ति।

**ता आचरन्ति समना पुरस्तात्**
**समानतः समना पप्रथानाः।**
**ऋतस्य देवीस्सदसो बुधाना**
**गवां न सर्गा उषसो जरन्ते।।**

| | | |
|---|---|---|
| देवीः ताः समना | - | द्योतमाना उषसः सर्वतस्समानाः |
| पुरस्तात् समानतः समना | - | पूर्वस्यां दिशि समानाद्देशात्, अन्तरिक्षात् सर्वतस्समानाः |
| पप्रथाना आचरन्ति | - | प्रथमानाः सर्वतः चरन्ति |
| ऋतस्य सदसः | - | सदः तत्रत्यं ऋत्विक् हविरादिकं |
| बुधाना उषस | - | बोधयन्त्यः एवं महानुभावास्ताः |
| गवां सर्गाः न | - | गवां सृष्टयः, ताः यथा सर्वत्र उपकारत्वात् स्तूयन्ते तद्वत् |
| जरन्ते | - | स्तूयन्ते। |

**भावार्थः**

प्रकाशरूपिण्यः ता उषसः सर्वत्र समप्रकाशका भूत्वा पूर्वस्यां दिशि, एकस्मादेव केन्द्रात् सर्वतो व्याप्य सर्वा दिशः प्रकाशयन्ति। तेनैव प्रकाशेन यज्ञशालायां विद्यमानानि हवींषि ऋत्विजश्च विशिष्य परिदृश्यन्ते। ता उषसः गवां सृष्ट्य दधिक्षीरघृतादय इव स्तूयन्ते। यथा दधिक्षीरघृतादयः सर्वत्र उपकारिणः भवन्ति तथा उषसोऽपि सवत्रोपकारिणो भवन्तीत्यर्थः।

**9. सन्द्रर्भ**

एता उषसः अन्धकारं निवार्य एकस्मिन्नेव समये सर्वासु दिक्षु समभावेन प्रकाशयन्ति।

**ता इन्वेव समना समानी-**
**रमीतवर्णा उषसश्चरन्ति।**
**गूहन्तीरभ्वमसितं रुशद्भि-**
**श्शुका स्तनूभिश्शुचयो रुचानाः।।**

**अन्वयः अर्थश्च**

| | | |
|---|---|---|
| अभ्वं असितं | - | महत् कृष्णरूपं |
| गूहन्तिः | - | गोपयन्त्यः |
| रुशद्भिः तनूभि | - | रोचमानैः स्वशरीरैः |
| शुक्राः शुचय रुचानाः | - | दीप्ताश्शुद्धारोचमानाः |
| ता उषसः इत समना एव | - | ता उषस एव एकधैव |
| समानीः | - | एकरूपाः |
| अमीतवर्णाः नु चरन्ति | - | अपरिमितवर्णाः सर्वतः क्षिप्रं चरन्ति |

**भावार्थः**

अतिगहनं गाढान्धकारमपावृत्य, निवारणं कृत्वा अत्यधिकं प्रकाशवत्यः, स्वशरीरैः दीप्ताःशुद्धाः भासमानाश्च ता उषसः एकस्मिन्नेव समये समभावेन समरूपेण च असंख्यैः वर्णैः शोभिता सर्वत्र शीघ्रं चरन्ति, सर्वासु दिक्षु स्वप्रकाशं प्रसारयन्तीत्यर्थः।

**10. सन्द्रर्भः**

सूर्यस्य दुहितरः उषसः सर्वदा पुत्रादिसम्पत्समृद्धिं अस्मान् प्रयच्छन्तु इति प्रार्थना अस्मिन् मन्त्रे वर्णिता।

**रयिं दिवो दुहितरो विभातीः**
**प्रजावन्तं यच्छतास्मासु देवीः।**
**स्योनादावः प्रतिबुद्ध्यमानाः**
**सुवीर्यस्य पतयः स्याम।।**

**अन्वयः अर्थश्च**

हे दिवः दुहितरः - द्योतमानस्यादित्यस्य दुहितृस्थानीयाः

हे विभातीः - विशेषेण भानं कुर्वत्यः

अस्मासु प्रजावन्तं रयिं आ यच्छत- पुत्राद्युपेतं धनं आभिमुख्येन दत्तम्

हे देवी स्योनात् - देव्यः सुखात् निमित्तभूतात्

वः प्रतिबुद्ध्यमानाः - युष्मान् प्रतिबोधयन्तो वयं

सुवीर्यस्य पतयः स्याम - पुत्रादिसहितस्य धनस्य पालका भवेम।

**भावार्थः**

प्रकाशवतः सूर्यस्य दुहितृस्थानीयाः अत्यन्तं मासमानाः हे उषसः यूयं अस्मभ्यं पुत्रादिसम्पत्समृद्धिं प्रयच्छत। हे देव्यः सुखजीवनमुद्दिश्य स्वकीयानभीष्टान् विज्ञापयन्तो वयं, युष्माकमुपासका वयं सत्सन्तत्यादि सर्वैश्वर्याणां पतयो भवेम।

**11. सन्दर्भः**

ऋषिः अनश्वरं यशः प्राप्तुं उषसां पुरतः प्रार्थना करोति।

**तद्वो दिवो दुहितरो विभातीः**
**उपब्रुव उषसो यज्ञकेतूः।**
**वयं स्याम यशसो जनेषु**
**तद्यौश्च धत्तां पृथिवी च देवी।।**

**अन्वयः अर्थश्च**

हे दिवः दुहितरः - सूर्यस्य पुत्र्यः

उषसः विभातीः - विशेषेण भानं कुर्वत्यः

वः तत् - उत्तरार्धेन वक्ष्यमाणं

यज्ञकेतुः - यज्ञ एव यस्य प्रज्ञापकः तादृशोऽहं

उपब्रुवे - उपेत्य ब्रवीमि

वयं जनेषु यशसः स्याम - अस्मत्समानेषु कीर्तेः स्वामिनो भवेम

तत् द्यौः च देवी पृथिवी च धत्तां - धारयतम्।

**भावार्थः**

द्योतामानस्य आदित्यस्य पुत्र्यः, भासमानाः हे उषसः, यज्ञरूपः संस्कार विशेषयुक्तोऽहं भवतां समीपमागत्य एवं ब्रवीमि यद्वयं नितरां कीर्तिमन्तो भवेम, अपि च अस्माकं कीर्तिः अनश्वरा भवेत्, सा कीर्तिः पृथिव्याँ द्युलोके च सुतरां व्यापृणोत्।

## इति उषस्सूक्तम् समाप्तम्

# अक्षसूक्तम् VII - 8 - 3

1 **भावार्थः**

ऋग्वेदे उपवर्णितमक्षसूक्तं सामाजिकदृष्टया अपि अत्यधिकं प्राधान्यमावहति। द्यूतक्रीडायाः दुष्परिणामं तथा द्यूतक्रीटाव्यसनिनः कस्यचन पुरुषस्य आत्मप्रलापञ्च वर्णयत्यस्मिन् सूक्ते। सूक्तस्यास्य द्रष्टा ऋषिः इलूषस्य पुत्रः कवषो भवति। अस्मिन् उपयुज्यमानं छन्दः त्रिष्टुप् सप्तमे मन्त्रे जगती च। अनेन सूक्तेन स्तूयमानो देवता अक्षो भवति। द्यूतफलके परिवर्तमाना अक्षाः कितवं अत्यधिकमाह्लादयन्ति इति प्रथमे मन्त्रे वर्णितम्।

**प्रावेपा मा बृहतो मादयन्ति**
**प्रवातेजा इरिणे वर्वृतानाः।**
**सोमस्येव मौजवतस्य भक्षो**
**विभीदको जागृविर्मह्यमच्छान्।।**

**अन्वयः अर्थश्च**

| | | |
|---|---|---|
| प्रवातेजाः | - | प्रवणदेशो जाताः |
| बृहतः | - | महतो विभीतकस्य फलत्वेन सम्बन्धिनः |
| इरिणे वर्वृतानाः | - | आस्फारे प्रवर्तमानाः। |
| प्रावेपाः | - | प्रावेपिणः कम्पनशीलाः |
| मा मादयन्ति | - | मां हर्षयन्ति |
| (किञ्च) जागृविः | - | कितवाञ्जागरणस्य कर्ता |
| विभीदकः | - | विभीतक विकारोक्षः |
| मौजवतस्य सोमस्य इव भक्षः | - | (मूजवति पर्वते जातस्य सोमस्य पानं यथा यजमानान् देवांश्च मादपन्ति तद्वत्) |
| महंय अच्छान् | - | मां चच्छन्दन्, अत्यर्थम्मादयन्ति। |

**भावार्थः**

द्यूतक्रीडाव्यसनिनः कस्यचन कितवस्य आत्मप्रलापात्मकमस्तीदं सूक्तम्। निम्नप्रदेशे जाताः बृहतः विभीतकवृक्षस्य बीजेन निर्मिताः द्यूतफलके परिवर्तमानाः एते अक्षाः मां अत्यधिकं हर्षयन्ति। पुनरपि द्यूतकराणं निद्रापहरणशीलाः एते अक्षाः मां अत्यधिकं आह्लादयन्ति, यथा मुजवति पर्वते उत्पन्नस्य सोमरसस्य पानं देवान् यजमानञ्च अत्यधिकं मादयन्ति।

2. द्यूतक्रीडाव्यसनेन कितवः सर्वगुणसम्पन्नां स्वजायामपि परित्यज्य क्रीडति।

**न मा मिमेथ न जिहील एषा**
**शिवा सखिभ्य उत मह्यमासीत्।**
**अक्षस्याहमेकपरस्य हेतोः**
**रनुव्रतामपजायामरोधम्।।**

**अन्वय अर्थश्च**

| | | |
|---|---|---|
| एषा मा न मिमेथ | - | अस्मदीया जाया कितवं मां न चुक्रोध |
| न जिहीले | - | न च लज्जितवती |
| सखिभ्यः शिवा आसीत् | - | अस्मदीयेभ्यः कितलेभ्य सुखकरी अभूत् |
| उत मह्यं | - | मह्यञ्च शिवा आसीत् |
| (इत्थं) अनुव्रतां जायां | - | अनुकूलां पत्नीं |
| एकपरस्य अक्षस्य | - | एकः परं प्रधानं यस्य तस्य |
| हेतोः अहं अप अरोधम् | - | कारणात् परित्यक्तवानस्मि। |

**भावार्थः**

ममैषा भार्या द्यूतक्रीडाव्यसनिनं मां विचिन्त्य कदापि क्रोधपरा नासीत्, तथा मम एतां दृर्गतिं विचिन्त्य मयि न लज्जितवती च। अपि च मम सहक्रीडकेभ्यः कितवेभ्यः अन्नपानादिकं दत्वा तेषां हितकारिणी आसीत्। ममापि वामा नासीत्। तां सद्गुणसम्पन्नां पतिव्रतां पत्नीं अहं केवलमक्षक्रीडव्यसनित्वात् परित्यक्तवान्। अस्यायमाशयः - द्यूतक्रीडालोलुपत्वं लोकिकधर्मान् पारिवारिकबन्धांश्च निस्सारतां करोति

**3. सन्दर्भः**

पत्निमात्रा कुपितः कितवः गृहात् निष्कासित इति वर्णयति।

**द्वेष्टि श्वश्रूरपजाया रुणद्धि**
**न नाथितो विन्दते मर्डितारम्।**
**अश्वस्येव जरतो वस्न्यस्य**
**नाहं विन्दामि कितवस्य भोगम्।।**

**अन्वयः अर्थस्च**

| | | |
|---|---|---|
| श्वश्रूः द्वेष्टि | - | गृहागतं कितवं निन्दति |
| (किञ्च) जायाअपरुणद्धि | - | निरुणद्धि |
| (अपि च) नाथितः | - | याचमानः कितवः |
| मर्डितारं न विन्दते | - | धनदानेन सुखयितारं न लभते। |
| जरतः वत्स्न्यस्य अश्वस्य इव | - | वृद्धस्य मूल्यार्हस्य अश्वस्येव |
| कितवस्य भोगं अहं न विन्दामि | - | न लभे |

**भावार्थः**

अक्षक्रीडया भविष्यमाणानि दुष्परिणामानि अनेन मन्त्रेण सूचयन्ति। क्रीडायां पराजितः कितवः रिक्तहस्तो भूत्वा यदा गृहमागच्छति तदा तस्य पत्निमाता तस्मै कुप्यति। तस्य जायापि गृहमागतं कितवं निरुणद्धि। याचमानमपि कितवं धनदानेन कोपि पुरुषः नाह्लादयति। यथा विक्रयणार्हाय वृद्धाश्वाय पर्याप्तं भोजनं तस्य स्वामी न ददाति तथा अयमपि कितवः गृहात् भोजनं न प्राप्नोति। गृहात् तस्य तिष्कासनमेव भवति।

**4. सन्दर्भः**

द्यूतक्रीडायां पराजितस्य कितवस्य पत्न्या सह प्रतिकितवाः दुर्व्यवहारं कुर्वन्ति, तस्मात् तस्य बान्धवाः तं अवधीरयन्ति।

**अन्ये जायां परिमृशन्त्यस्य**
**यस्यागृधद्वेदने वाज्यक्षः।**
**पिता माता भ्रातर एनमाहुः**
**न जानीमो नयता बद्धमेतम्।।**

**अन्वयः अर्थश्च**

| | | |
|---|---|---|
| यस्य वेदने वाजी अक्षः | - | यस्य कितवस्य धने बलवानक्षः |
| अगृधत् | - | अभिकांक्षां करोति |
| (तस्य) अस्य जायां | - | कितवस्य भार्यां |
| अन्ये परिमृशन्ति | - | प्रतिकितवाः वस्त्रकेशाद्याकर्षणेन संस्पृशन्ति |
| (किञ्च) पिता, माता, भ्रातर एनं | - | कितवं |
| ''न जानीमः बद्धमेतं नयत'' | - | अयन्नास्मदीयः यथेष्टदेशं प्रपयत इति |
| आहुः | - | वदन्ति। |

**भावार्थः**

यस्य कितवस्य धनमिच्छमानः बलवन्तोऽक्षाः अर्थात् यः कितवः द्यूतक्रीडालोलुपः पराजितश्च भवति तस्य भार्यां अन्ये विजेतारः प्रतिकितवा वस्त्रकेशद्याकर्षणेन संस्पृशन्ति अर्थात् अपमानं कुर्वन्ति। एतद्दृष्ट्वा खिन्नाः कुपिताश्च तस्य कितवस्य पिता, माता, भ्रातरश्च एनं परित्यक्तुं विवशा भवन्ति, ते प्रतिकितवान् एवं वदन्ति यत् नायमस्मदीयः पुरुषः, वयं तं न जानीमः ते बद्ध्वा यत्र कुत्रापि कारागारे स्थापयन्तु।

**5. सन्दर्भः**

अनन्तरं एभिरक्षैः न क्रीडिष्यामीति प्रतिज्ञाय कितवः पुनः प्रतिज्ञां विस्मृत्य क्रीडायां व्यापृतो भवति।

**यदादीध्ये न दविषाण्येभि**
**परायद्भ्योऽवहीये सखिभ्यः।**
**न्युप्ताश्च बभ्रवो वाचमक्रत**
**एमीदेषां निष्कृतं जारिणीव।।**

**अन्वयः अर्थश्च**

| | | |
|---|---|---|
| एभिः न दविषाणि | - | न देविष्यामीति |
| यदादीध्ये | - | यदाध्यायामि तदा |
| परायद्भ्यः सखिभ्यः | - | स्वयमेव परागच्छद्भ्यः सखीभूतेभ्य कितवेभ्यः |
| अवहीये | - | अवहितो भवामि, नाहं प्रथममक्षान् विसृजामि |
| (किञ्च) बभ्रवः नि उप्ताः | - | बभ्रुवर्णाः अक्षा कितवैरवक्षिप्तास्सन्तः |
| वाचमक्रत | - | शब्दं कुर्वन्ति च (तदा सङ्कल्पं परित्यज्य अक्षव्यसनेनाभिमूयमानोहम्) |
| एषां निः कृतं | - | अक्षाणां स्थानं |
| जारिणी इव | - | (कामव्यसनेनाभिभूयमाना स्वैरिणी सङ्केतस्थानं यथा याति तद्वत् |
| एमि इत् | - | गच्छम्येव। |

**भावार्थः**

एभिरक्षैः पुनरहं न क्रीडिष्यामीति स कितवः मनसि प्रतिज्ञां करोति। किन्तु प्रतिकितवैः प्रेरितः सः पुनः क्रीडार्थमुपविशति। अनन्तरं स'नाहं प्रथममक्षान् क्षिपामि' इति निश्चिनोति, किन्तु यदा बभ्रुवर्णयुक्ता प्रतिकितवैः क्षिप्ता अक्षाः शब्दं कुर्वन्ति तदा सः स्वकीयां प्रतिज्ञां विस्मृत्य द्यूतक्रीडालोलुपत्वात् अक्षक्रीडाफलकं प्राप्नोति। अत्रायं दृष्टान्तः - यथा कामातुरा स्वेच्छा चारिणी काचन नारि स्वकीयं सङ्केतस्थानं प्रति गच्छति तथा अयमपि कितवः अक्षक्रीडां प्रति आसक्तो भूत्वा गच्छति।

**6. सन्दर्भः**

एवं क्रीडायां आकृष्टः कितवः जेष्यामीति विश्वासेन द्यूतसभां गच्छति।

**सभामेति कितवः पृच्छमानो**
**जेष्यामीति तन्वा शूशुजानः।**
**अक्षासो अस्य वितिरन्ति कामं**
**प्रतिदीव्नेदधत आ कृतानि।**

**अन्वयः अर्थश्च**

| | | |
|---|---|---|
| तन्वा शूशुजानः | - | शरीरेण शोशुचानः, दीप्यमानः |

| | | |
|---|---|---|
| कितवः जेष्यामि इति | - | कोऽत्रास्ति धनिकः तञ्जेष्यामीति |
| पृच्छमानः सभां एति | - | पृच्छन् कितवस्समूहं गच्छति |
| तत्र प्रतिदीव्ने | - | प्रतिदेवित्रे |
| कृतानि | - | देवनोपयुक्तानि कर्माणि |
| आदधतः | - | जयार्थमाभिमुख्येन दधतः |
| अस्य कामं अक्षासः वितिरन्ति | - | इच्छामक्षा वर्धयान्ति |

**भावार्थः**

एवमक्षैराकृष्टः स कितवः आत्मविश्वासेनोत्तेजितः सन् प्रसारितवक्षस्थलो भूत्वा अत्र को धनिकः विजेतारश्च सन्ति तानहं पराजयकोटिं प्रापयिष्यामि इत्युद्घोषयन् द्यूतसभां प्रविशति। अत्र प्रति कितवान् पराजेतुं यादृशी क्रीडा आवश्यकी भवति तादुशीं क्रीडां स क्रीडति। एते अक्षाः एवं सङ्क्रीडमानस्य तस्य मनसि क्रीडां प्रति इच्छां उत्साहञ्च संवर्धयन्ति।

7. **सन्दर्भः**

एते अक्षाः पराजितानां हृदयभेदकाः विजेतृणां सन्तोषकारकाः च भवन्ति।

**अक्षास इदङ्कुशिनो नितोदिनो**
**निकृत्वानस्तपना स्तापयिष्णवः।**
**कुमारदेष्णा जयतः पुनर्हणो**
**मध्वा सम्पृक्ताः कितवस्य बर्हणा।।**

**अन्वयः अर्थश्च**

अक्षास इत् अङ्कुशिनः - अक्षा एव अङ्कुशिनः

| | | |
|---|---|---|
| नितोदिनः | - | नितोदितवन्तः |
| निकृत्वानः | - | पराजये निकर्तनशीलाः |
| तपनाः | - | पराजये कितवस्य सन्तापकारकाः |
| तापयिष्णवः | - | सर्वस्य हारकत्वेन अन्तस्तापनशीला भवन्ति |
| (किञ्चि) जयतः कितवस्य | - | विजयितुस्तस्य |
| कुमारदेष्णाः | - | कुमाराणां दातारो भवन्ति |
| (अपि च) मध्वा सम्पृक्ताः | - | मधुना प्रतिकितवेन |
| बर्हणा पुनः हनः | - | सर्वस्वहरणेन कितवस्य पुनर्हन्तारो भवन्ति। |

**भावार्थः**

अस्मिन् मन्त्रे अक्षाणां क्रूरस्वभावं वर्णयति। एते अक्षाः अङ्कुशा एव भवन्ति। ते अत्यधिकं देहशूलोत्पादका भवन्ति। तथा च पराजये शरीरच्छेदनसमाना भवन्ति, पराजयरूपिणः सन्तापस्य

कारका भवन्ति। पराजितानां कितवानां सर्वस्वहरणेन अन्तस्तापसंवर्धका भवन्ति विजेतृणां कितवानां कृते एते अक्षाः कुमारदातार इव प्रीतिदायका भवन्ति। अक्षाः एतान् विजेतृन् प्रथमं विजयस्य माधुर्यं पाययते, पुनः तेषां सर्वस्वापहरणेन तान् नितान्तदुःखसागरे निमज्जयन्ति एवं ते कितवानां सन्तापकारका हन्तारो भवन्ति।

**8. सन्दर्भः**

सकलजनानां रक्षको दण्डदाता राजापि अक्षाणां पुरतः साञ्जलिबद्धं नस्करोति।

**त्रिपञ्चाशः क्रीऴति व्रात एषां**
**देव इव सविता सत्यधर्मा।**
**उग्रस्य चिन्मन्यवे ना नमन्ते**
**राजाचिदेभ्यो नम इत्कृणोति।।**

**अन्वयः अर्थश्च**

| | | |
|---|---|---|
| एषां त्रिपञ्चाशः व्रातः | - | अक्षाणां त्रधिक पञ्चाशत्संख्यकास्संघः |
| सत्यधर्मा सविता देव इव | - | यथा सर्वस्य प्रेरकस्सविता जगति विहरति तद्वत् |
| क्रीऴति | - | अस्फारे विहरति |
| (किञ्च) उग्रस्य चिन्मन्यवे | - | क्रूरस्यापि क्रोधाय एते अक्षाः |
| न नमन्ते | - | न प्रह्वीभवन्ति, तन्न नमयन्ति |
| राजा चित् | - | जगत ईश्वरोपि |
| एभ्यः नम इत्कृणोति | - | देवनवेलायां नमस्कारमेव करोति, नावज्ञां करोति) |

**भावार्थः**

यथा सत्यधर्मा जगतां ऊर्जप्रदानेन प्रेरकः सूर्यः आकाशमण्डले विचरति तद्वत् एषामक्षाणां त्रिपञ्चाशत्संख्यकाः सङ्घः द्यूतफलके विचरति। अपि चैते अक्षाः कूरस्वभावयुक्तस्य पुरुषस्य क्रोधात् कदापि न बिभ्यन्ति। सकलजनानां रक्षकः दण्डदाता राजापि अक्षाणां पुरतः कृताञ्जलिर्भवति। कदापि ते अक्षान् न निन्दन्तीत्यर्थः

**9. सन्दर्भः**

द्यूतफलके परिवर्तमाना अक्षाः दिव्याग्नय इव द्यूतक्रीडकानां सन्तपकारका भवन्ति

**नीचा वर्तन्त उपरि स्फुर-**
**न्त्यहस्तासो हस्तवन्तं सहन्ते।**
**दिव्या अङ्गारा इरिणे न्यूप्ताः**
**शीतास्सन्तो हृदयं निर्दहन्ति।।**

**अन्वयः अर्थश्च**

| | | |
|---|---|---|
| (अपि च तेऽक्षाः) नीचा वर्तन्ते | - | नीचीनस्थले स्थिता भवन्ति |
| (तथापि) उपरि स्फुरन्ति | - | पराजयभीतानां कितवानां हृदयस्योपरि प्रकटीभवन्ति |
| अहस्तासः हस्तवन्तं सहन्ते | - | (हस्तरहितास्ते हस्तसहितं द्यूतकरमभिभवन्ति |
| दिव्या अङ्गाराः | - | दिवि भवाः, अपकृताः अङ्गारसदृशाः अक्षाः |
| इरिणे न्युप्ताः | - | इन्धनरहिते आस्फारे विक्षिप्ताः |
| शीतस्सन्तः | - | शीतस्पर्शास्सन्तोऽपि |
| हृदयं निः दहन्ति | - | भस्मीकुर्वन्ति। |

**भावार्थः**

एते अक्षाः क्रीडावसरे द्यूतपट्टस्योपरि विचरन्ति अर्थात् कितवानामधस्थले एवैषां विहारो भवति, किन्तु पराजभीत्या एते कितवानां हृदयस्योपरि प्रस्फुरन्ति, अर्थात् कितवस्य हृदयं मर्दयन्ति। अपि च द्यूतक्रीडाविलग्नाः कितवा यादृशोऽपि बलशालिनः स्युः तानपि हस्तरहिता एते अक्षाः पराभवन्ति। एवं शीतस्पर्शवन्तः एते अक्षाः कितवानां पराजयकारणभूतास्सन्तः तेषां सर्वस्वहरणेन सपरिवारं तेषां हृदयं दहन्ति। समान्यतः अग्नेरुष्णस्पर्शवत्वं स्वभावः, किन्तु एते अक्षाः दिव्याग्नय इव शीतस्पर्शवन्तः सन्नपि कितवानां मनः सन्तापयन्ति।

**10. सन्दर्भः**

पराजितस्य कितवस्य पत्नी माता च तं विचिन्त्य दुःखिते भवतः स च रात्रौ चौर्यार्थं अन्यस्य धनिकस्य गृहं गच्छति।

**जाया तप्यते कितवस्य हीना**
**माता पुत्रस्य चरतः क्वस्वित्।**
**ऋणा वा बिभ्यद्धनमिच्छमानो-**
**न्येषामस्तमुप नक्तमेति।।**

**अन्वयः अर्थश्च**

| | | |
|---|---|---|
| क्वस्वित् चरतः | - | क्वापि निर्वेदात् गच्छतः |
| कितवस्य जाया हीना तप्यते | - | परित्यक्ता वियोगजसन्तापेन व्यथामाप्नोति |
| माता पुत्रस्य | - | सम्बन्धात् हीना सन्तप्यते |
| ऋणावा बिभ्यत् | - | अक्षपराजयादृणवान्, भीतस्सन् |
| धनमिच्छमानः | - | स्तेयजनितं धनं कामयमानः |
| अन्येषां अस्तं नक्तं | - | गृहं चौर्यार्थं रात्रौ |
| उप एति | - | उपगच्छति |

**भावार्थ**

बहुवारं क्रीडित्वा पराजयेन वैराग्यातुरः स कितवः गृहं त्यक्त्वा इतस्ततो विचरति। परित्यक्ता तस्य पत्नी पत्युः ईदृशीं दशामवलोक्य अत्यधिकं सन्तापमनुभूयते। प्रतिकतवानां भीत्या इतस्ततः परिभ्रमन्तं स्वपुत्रं विचिन्त्य तस्य मातापि अतीवदुःखिता भवति। स कितवस्तु पुनरपि क्रीडितुं धनमिच्छन् यं कमपि दातारं मार्गयति। तत्रापि हताशो भूत्वा रात्रौ चौर्यार्थं अन्यस्य कस्यचन धनिकस्य गृहं प्राप्नोति।

**11. सन्दर्भ**

अन्येषां सुन्दरं गृहं सर्वाभरणविभूषितां पत्निञ्च दृष्ट्वा कितवः अत्यधिकं अपकर्षबोधं अनुभूयते।

**स्त्रियं दृष्ट्वाय कितवं ततापा-**
**न्येषां जायां सुकृतञ्च योनिम्।**
**पूर्वाह्णे अश्वान् युयुजे हि बभ्रून्**
**सो अग्नेरन्ते वृषलः पपाद।।**

**अन्वयः अर्थश्च**

| | | |
|---|---|---|
| कितवं | - | कितवः (विभक्तिव्यत्ययः) |
| अन्येषां | - | स्वव्यतिरिक्तानां पुरुषाणां |
| जायां स्त्रियं | - | भार्यां, सुखेन वर्तमानां नारीं |
| सुकृतं योनि च | - | सृष्ठु कृतं गृहञ्च |
| दृष्ट्वाय ताप | - | मज्जाया दुःखिता गृहञ्च असंस्कृतमिति ज्ञात्वा तप्यते |
| (पुनः) पूर्वाह्णे | - | प्रातः काले |
| बभ्रून् अश्वान् युयुजे हि | - | बभ्रुवर्णान् व्यापकानक्षान् युनक्ति एव |
| (पुनश्च) वृषलः सः | - | वृषलकर्मा कितवः |
| (रात्रौ) अग्नेरन्ते पपाद | - | अग्नेरन्तिके शीतार्तस्सन् शेते। |

**भावार्थः**

अस्य कितवस्य मानसिकीमवस्थां अस्मिन् मन्त्रे वर्णयति। सः अन्यपुरषाणां सर्वाभरणविभूषितां पत्नीं तेषां सुसज्जं सुन्दरञ्च गृहं दृष्ट्वा ''मम पत्नी मम ईदृशीमवस्थां विचिन्त्य अतीवदुःखिता भवति, तथा च मम गृहमपि भग्नं शुचित्वहीनञ्च भवतीति'' विचिन्त्य अत्यधिकं दुःखमनुभूयते। तथापि सः क्रीडायाः स्वात्मानं निवर्तयितुं अशक्तो भवति। पुनश्चायं प्रभाते बभ्रुवर्णयुक्तैरक्षैः क्रीडायां प्रवर्तते हीनकर्म स कितवः पराजितो भूत्वा रात्रौ शीतबाधया कुत्रापि अग्नेः सकाशं स्वपिति।

**12. सन्द्रर्भः**

एवं द्यूतक्रीडायाः दुष्परिणामं सम्यगवबूद्ध्य कितवः तस्मादात्मानं मोक्तुं निश्चयं करोति

**यो वः सेनानीर्महतो गणस्य**
**राजा व्रातस्य प्रथमो बभूव।**
**तस्मै कृणोमि न धना रुणध्मि**
**दशाहं प्राचीस्तदृतं वदामि।।**

**अन्वयः अर्थश्च**

(हे अक्षाः) वः महतः गणस्य - सङ्घस्य

| | | |
|---|---|---|
| यः सेनानी बभूव | - | नेता भवति |
| यः व्रातस्य राजा प्रथमः | - | सङ्घस्येश्वरः मुख्यो भवति |
| तस्मै कृणोमि | - | अहमञ्जलिङ्करोमि |
| (अतः परं) धना न रुणध्मि | - | धनान्यक्षार्थमहं न सम्पादयामि |
| अहं दश | - | दशसंख्याका अङ्गुलीः |
| प्राचीः | - | प्राङ्मुखीं करोमि |
| तत् ऋतं वदामि | - | एतत् सत्यमेव वदामि |

**भावार्थः**

एवं पश्चात्तापविवशः स द्यूतकरः द्यूतक्रीडायाः दुष्परिणामं सम्यगवबुद्ध्य स्वयं तस्याः स्वात्मानं निवर्तयितुमशक्तो भूत्वा तदर्थं साञ्जलिबद्धः मुक्तिं प्रार्थयते। अक्षान् प्रति तस्येयं प्रार्थना एवं भवति - हे अक्षाः भवतां यः सेनानी भवति तमहं नमस्करोमि, पुनः क्रीडायै मां मा प्रलोभय, कदाप्यहं क्रीडायै धनं न सम्पादयामि इति सत्यं वदामि। तदपि हस्तयोः दश अङ्गुलिं प्रसार्य भवन्तमहं प्रार्थयामि, स्वकीयजालात् मां विमुञ्चेति।

**13. सन्द्रर्भः**

द्यूतक्रीडाव्यसनं परित्यज्य कृषिं कर्तुं सवितुरुपदेशमत्र प्रस्तूयते।

**अक्षैर्मा दीव्यः कृषिमित् कृषस्व**
**वित्ते रमस्व बहुमन्यमानः।**
**तत्र गावः कितव तत्र जाया**
**तन्मे विचष्टे सवितायमर्यः।।**

**अन्वयः अर्थश्च**

| | | |
|---|---|---|
| हे कितव बहुमन्यमान | - | मद्वचने विश्वासं कुर्वंस्त्वं |
| अक्षैः मा दीव्यः | - | द्यूतं मा कुरु |
| कृषिमित् कृषस्व | - | कृषिमेव कुरु |
| वित्ते रमस्व | - | कृष्या सम्पादितेन धनेन रतिङ्कुरु |
| तत्र गावः | - | कृषौ गावो बहवो भवन्ति |
| तत्र जाया | - | सर्वोत्कर्षेण वर्तमाना भवति |

| | | |
|---|---|---|
| तत् सविता | - | तद्धर्मरहस्यं सर्वस्य प्रेरकः |
| अयं अर्यः | - | दृष्टिगोचर ईश्वरः |
| मे विचष्टे | - | मह्यं विविधमाख्यातवान्।। |

**भावार्थः**

द्यूतक्रीडाव्यसनस्य दुष्परिणामं सोदाहरणमुपवर्ण्य ऋषिः कितवाय इममुपदेशं ददाति - हे कितव, मम वचसि विश्वासं कुर्वन् व्यसनमिमं परित्यज। कृषिकार्यादिषु विषयेषु श्रद्धां कुरु। कृषिकार्यादेव तव जीवनं सुखमयं भविष्यति। तस्मादार्जितेन धनेन स्वजीवनं सन्तुष्टपूर्णं कुरु। तास्मिन्नेव जीवने तव जाया सन्तुष्टा भवेत्। कृषिकार्यादेव बहवः गावः तव भविष्यन्ति। इदं धर्मरहस्यं जगतः प्रेरकः सविता एव मामुक्तवान्। कृषेराधारभूतायाः वृष्टेः कारकः सविता एव भवति। अतः ऋषिः उपदेशस्यास्य कारकत्वं सवितरि अवारोपयत्।

**14. सन्दर्भः**

कितवः अक्षैस्सह मैत्रीं प्राप्तुमिच्छन् तदर्थं आक्षान् प्रार्थयते।

**मित्रं कृणुध्वं खलु मृऴता नो**
**मानो घोरेण चरताभि धृष्णु।**
**निवो नु मन्युर्विशतामरातिः**
**अन्यो बभ्रूणां प्रसितौ न्वस्तु।।**

(हे अक्षाः यूयं)

| | | |
|---|---|---|
| मित्रं कृणुध्वं खलु | - | अस्मान् मैत्रीं कुरुत |
| नः मृऴत | - | अस्मान् सुखयत च |
| नः धृष्णु | - | धृष्णुना (तृतीयार्थे प्रथमा) |
| घोरेण ना अभिचरत | - | असह्येन बलेन मा गच्छत |
| (किञ्च) वः मन्युः नु | - | युष्माकं क्रोधः अद्य |
| अरातिः नि विशतां | - | अस्मच्छत्रुषु तिष्ठतु |
| अन्यः बभ्रूणां प्रसितौ | - | शत्रुः बभ्रुवर्णानं युष्माकं प्रबन्धने |
| नु अस्तु | - | क्षिप्रं भवतु। |

**भावार्थः**

सूक्तस्यास्य अन्तिमे मन्त्रे कितवः अक्षैस्सह मित्रतां प्राप्तु प्रार्थनां करोति, हे अक्षाः यूयं मया सह मित्रतां कुरुत। सर्वदा मम हितं भावयत। सपरिवारं सज्ञातिबान्धवं मां सुखयत। सर्वनाशकारिणं भवतां क्रोधं अस्मच्छत्रुषु एव नियोजयत। तथाच अन्योपि मम शत्रवः बभ्रुवर्णयुक्तानां भवतां बन्धने शीघ्रमेव पतन्तु। अर्थात् ते शत्रवः घूतक्रीडाव्यसनिनो भवन्त्वति। अनया प्रार्थनया सह सूक्तमिदपसंहरते।

## इति अक्षसूक्तं समाप्तम्

# MODULE 2

# मनुस्मृतिः

## अष्टमोऽध्यायः

मनुस्मृतेः अष्टमोऽध्यायः व्यवहाराध्याय इत्युच्यते । अस्मिन्नध्याये अष्टादशव्यवहारस्थानानि, साक्षीणां विवरणं इत्यादि विषयाः निरूपिता :। राजा विनीतो भूत्वा व्यवहारसभायां प्रविशेत् इति प्रथमश्लोकस्य आशयः

1. व्यवहारान् दिदृक्षुस्तु ब्राहमणैस्सह पार्थिवः।
मन्त्रज्ञैर्मन्त्रिभिश्चैव विनीतः प्रविशेत्सभाम्।।

**अन्वयः**

व्यवहारान् दिदृक्षुः पार्थिव : तु ब्राह्मणै : मन्त्रज्ञै : मन्त्रिभिश्च सह विनीत एव सभां प्रविशेत्।

**व्याख्या**

प्रजानां ऋणादानादि व्यवहारान् परिजिहीर्षुः राजा विशिष्टैःब्राह्मणैः तथा न्यायान्यायतत्वज्ञै : सचिवैस्सह विनीतः क्षमाशीलश्च भूत्वा सभायां प्रविशेत्। सभायां राज्ञा कोपो न करणियः।

2. तत्रासीनः स्थितो वापि पाणिमुद्यम्य दक्षिणम्
विनीतवेषाभरणः पश्येत् कार्याणि कार्यिणाम्।।

**अन्वयः**

तत्र आसीनः स्थितो वा अपि दाक्षिणं पाणिं उद्यम्य विनीतवेषाभरणः कार्यिणां कार्याणि पश्येत्।

**व्याख्या**

व्यवहारसभायां कार्याणां गौरवलाधवौ संशोध्य गौरवकार्याणि उपविश्य लघुकार्याणि स्थित्वा च राजा विनीत वेषः अल्पभूषणो भूत्वा च कार्याणां विचारविमर्शः कुर्यात्।

3. प्रत्यहं देशदृष्टैश्च शास्त्रदृष्टैश्च हेतुभिः।
अष्टादशसु मार्गेषु निबद्धानि पृथक् पृथक्।।

**अन्वयः**

अष्टादशसु मार्गेषु देशदृष्टैः शास्त्रदृष्टैश्च हेतुभिः प्रत्यहं पृथक् पृथक् निबद्धानि।

**व्याख्या**

वक्ष्यमाणेषु अष्टादशप्रकारेषु व्यवहारस्थानान् शास्त्रविहितैः न्यायान्यायविषयैः सम्यक् विचिन्त्य विचारःकरणीयः। प्रत्येकव्यवहारविचारे देशजातिकुलादीन् सम्यगवधार्य अचारमर्यादादीन् परिगणय्य च विशेषश्रद्धा कार्या।

अष्टादशव्यवहारस्थानानि वक्ष्यन्ते-

4. तेषामाद्यमृणादानं निक्षेपोƒस्वामिविक्रयः।
सम्भूय च समुत्थानं दत्तस्य़ानपकर्म च ।।

5. वेतनस्यैव चादानं संविदश्च व्यातिक्रमः।
क्रयाविक्रयानुशयो विवादः स्वामिपालयोः।।

6. सीमा विवादधर्मश्च पारुष्ये दण्डवाचिके।
स्तेयं च साहसं चैव स्त्रीसंग्रहणमेव च।।

7 स्त्रीपुंधर्मो विभागश्च द्यूतमाह्वय एव च।
पदान्यष्टादशैतानि व्यवहारस्थिताविह ।।

**अन्वयः**

तेषां आद्यं ऋणादानं, निक्षेपः अस्वामिविक्रयः च सम्भूय समुत्थानं, दत्तस्य अनपकर्म च, वेतनस्य आदानं एव च, संविदः व्यतिक्रमः च, क्रयविक्रयानुशयः, स्वामिपालयोः विवादः, सीमाविवादधर्मः पारुष्ये, दण्डवाचिके च, स्तेयं, च साहसं च एव स्त्रीसंग्रहणं एव च , स्त्रीपुंधर्मः, विभागःच द्यूतं, आह्वय एव च इह व्यवहारस्थितौ एतानि अष्टदशपदानि।

**व्याख्या**

अष्टादशव्यवहारस्थानानि क्रमशः प्रतिपाद्यन्ते। ऋणं स्वीकृत्य तस्य प्रतिदाननिरासः, न्यासस्य विक्रयःतथा अनाथवस्तुनो विक्रयःसम्मिल्य क्रियमाणानि क्रयविक्रयादीनि, दानरूपेण समार्पितस्य वस्तुनः अदानं, कार्यकर्त्रे वेतनस्य अदानं विश्वासोल्लंघनं, क्रयविक्रयादिभ्यो विनिवर्तनं, स्वामिभृत्ययोः संवादः, गृहस्य क्षेत्रस्य वा सीमाविषये संवादः, परस्परमुष्टियुद्धः, आतड़कप्रसारणं, चौर्यकर्म, परदाराभिगमनं, दाम्पत्यजीवने भर्तृभार्ययोः परस्परविवादस्य न्यायान्यायविवेचनं, दायादविभाजनं, धनादिकं निष्करुपेण उपयुज्य द्यूतक्रीडा, वृषभकुक्कुटादीनं युद्धं कारयित्वा तेषां जयापजयविषये विवादः एतानि अष्टादशप्रकारणि व्यवहारस्थानानि भवन्ति । एषां व्यवाहराणां निर्णयः राज्ञा करणीयः।

8. एषु स्थानेषु भूयिष्ठं विवादं चरतां नृणाम् ।
धर्मः शाश्वतमाश्रित्य कुर्यात् कार्यविनिर्णयम्।।

**अन्वयः**

एषु स्थानेषु भूयिष्ठं विवादं चरतां नृणां शाश्वतं धर्म आश्रित्य कार्यविनिर्णयं कुर्यात्।

**व्याख्या**

उपरिनिर्दिष्टेषु व्येवहारस्थानेषु विवादं कुर्वतां जनानां कृते विवादानामेषां न्यायान्यायविवेचनं कृत्वा तथा शाश्वतं धर्ममार्गमवलम्ब्यैव निर्णयः करणीयः। एतान्यष्टादशव्यवहारस्थानान्यन्तरा अन्यान्यपि व्यवहारस्थानानि विवादानि च भविष्यान्ति।

'भूयिष्ठं' इति शष्देन एतानि विवादस्थानान्यपि विवक्ष्यन्ते। अनादिकालादेव रूपीकृत इत्यस्मात् कारणात् धर्मः शाश्वतो भवति।

9. यदा स्वयं न कुर्यात्तु नृपतिः कार्यदर्शनम्।
तदा नियुञ्ज्याद् विद्वांसं ब्राह्मणं कार्यदर्शने।।

**अन्वयः**

यदा नृपतिःस्वयं कार्यदर्शनं न कुर्यात् तदा विद्वांसं ब्राह्मणं कार्यदर्शने नियुञ्ज्यात्।

**व्याख्या**

राजा यदा रोगातुरत्वात् कृत्यान्तरबाहुल्याद्वा कार्यविचारं विधिनिर्णयञ्च कर्तुमसमर्थो भवेत् तदा अस्मिन् विषये विद्वांसं न्यायान्यायविवेचनविचक्षणं ब्राह्मणं नियोजयेत्।

10 से/स्य कार्यणि सम्पश्येत् सभ्यैरेव त्रिभिर्वृतः।
सभामेव प्रविश्याग्र्यामासीनः स्थित एव वा।।

**अन्वयः**

सः सभ्यैः त्रिभिः वृत एव अग्र्यां सभां प्रविश्य आसीनः स्थित एव वा अस्य कार्यणि सम्पश्येत्।

**व्याख्या**

कृत्यान्तारबाहुल्यात् राज्ञा नियुक्तः स ब्राह्मणः अन्यैः विवेकशालिभिः त्रिभिःब्राह्मणौः सह श्रेष्ठामिमां सभां प्रविश्य स्थित्वा उपविश्य वा राज्ञा करणीयानि विधिनिर्णयानि कुर्यात् ।अत्रायं ब्राह्मणः राज्ञः प्रतिपुरुषो भवति ।आतः यः कोपि निर्णयः अनेन स्वीक्रियते स राज्ञः निर्णयो भवति। स्थित्वा अपविश्य वेत्यनेन भ्रमणं कृत्वा कार्यविचारः कार्यनिर्णयो वा न करणीय इत्यर्थः।

11 यस्मिन् देशे निषीदन्ति विप्रा वेदविदस्त्रयः।
राज्ञश्चाधिकृतो विद्वान् ब्रह्मणस्तं सभां विदुः।।

**अन्वयः**

राज्ञः अधिकृतः विद्वान् वेदविदः त्रयः विप्राःच यस्मिन् देशे निषीदन्ति तां ब्रह्मणः सभां विदुः।

**व्याख्या**

कृत्यान्तरबाहुल्यात् राज्ञा नियुक्तः स ब्राह्मणः वेदविद्भिः अन्यैस्त्रिभिः विद्वद्भिः सह यस्मिन् देशो यस्यां सभायां वा उपविशन्ति, कार्याकार्यविवेचनं कृत्वा विधिनिर्णयं कुर्वान्ति तां सभां 'ब्रह्मसभा' इति विद्वासः प्रवदन्ति। तेषां निर्णयः न्यूनरहितःश्लाघनीयश्च भवति ।

12. धर्मो विद्धस्त्वधर्मेण सभां यत्रोपतिष्ठते।
शल्यं चास्य न कृन्तन्ति विद्धास्तत्र सभासदः।

**अन्वयः**

यत्र अधर्मेण विद्धः धर्मः सभां उपतिष्ठते अस्य शल्यं न कृन्तन्ति च तत्र सभासदः विद्धाः।

**व्याख्या**

धर्मःसर्वदा निर्णायकैः विद्वद्भिः रक्षणीयो भवति। सभायां न्यायान्यायविचारणावसरे धर्ममार्ग एव स्वीकरणीयः। यदि आधर्ममार्गेण धर्मः बाधते अर्थात् अधर्मस्य विजयः धर्मस्य पराजयश्च भवति सा सभा दूषिता भवति, स दोषः सभासदं अर्थात् निर्णायकमेव बाधते।

13 सभां वा न प्रवेष्टव्यं वक्तव्यं वा समञ्जसम्।

अब्रुवन् विब्रुवन्् वापि नरो भवति किल्बिषी।।

**अन्वयः**

सभां न वा प्रवेष्टव्यं समञ्जसं वा वक्तव्यम्। अब्रुवन् विब्रुवन् वा अपि नरः  किल्बिषी भवती।

**व्याख्या**

सामान्यजनैः सभायां प्रवेशः कदापि न करणीयः। व्यवहारसभायां सामान्यजनस्य प्रवेशनं अनावश्यकं भवति। यदि गन्तव्यं चेत् तत्र सत्यमेव वक्तव्यम् । यः सभां गत्वा सत्यं न वदति असत्यं वदति च सः सर्वदा पापी भवति। व्यवहारसभायां कष्टपक्षत एव गन्तव्यं अन्यथा कदापि न गन्तव्यमित्यर्थः।

14. यत्र धर्मे ह्यधर्मेण सत्यं यत्रनृतेन च ।

हन्यते प्रेक्षमाणानां हतास्तत्र सभासदः।।

**अन्वयः**

यत्र हि धर्मः अधर्मेण यत्र सत्यं अनृतेन च हन्यते तत्र प्रेक्षमाणानां सभासदः हताः।

**व्याख्या**

न्यायालये न्यायाधिपैः सर्वदा सत्यस्य धर्मस्य च पालनं करणीयमित्युच्यते। यस्मिन् न्यायालये धर्मस्योपरि अधर्मस्य तथा सत्यस्योपरि असत्यस्य च जयो दृश्यते तस्य न्यायालयस्य न्यायाधिपा अपि पापग्रस्ता भविष्यन्ति। सा सभा हता इति मन्यते।

15. धर्म एव हतो हन्ति धर्मो रक्षति रक्षितः।

तस्माद्धर्मो न हन्तव्यो मा नो धर्मो हतो वधीत्।।

**अन्वय**

हतो धर्म एव हन्ति, रक्षितो धर्मः रक्षति, तस्मात् धर्मः न हन्तव्यः हतो धर्मः मा न वधीत्।

**व्यख्या**

यस्मिन् न्यायालये धर्मः न परिपाल्यते - स धर्मः एव न्यायाधिपं हन्ति, अर्थात् तस्य दुष्कीर्तिकारको भविष्यतिः। धर्ममार्गेण यः न्यायपरिपालनं कुर्वन्ति स एव धर्मः तं रक्षति। अतः धर्मस्य उल्ल्ङ्घनं कदापि न कार्यं, हतः धर्मः युष्माभिस्सह अस्मानपि हनिष्यति। न्यायालये धर्मः सर्वदा परिपालनीयः इति अपराधिनं व्यवहारिणं प्रति च घोषणा अत्र ध्वन्यते।

16. वृषो हि भगवान् धर्मस्तस्य यः कुरुते ह्यलम्।

वृषलं तं विदुर्देवास्तस्माद्धर्मं न लोपयेत्।।

**अन्वयः**

भगवान् धर्मः हि वृषः यः हि तस्य अलं कुरुते, देवाः तं वृषलं विदुः तस्मात् धर्म न लोपयेत्।

**व्याख्या**

परमप्रधानो धर्मो वृष इति कथ्यते। यः धर्मं निस्सारतां कुरुते अथवा तस्य उल्लङ्घनं कुरुते तं वृषलमिति देवाः कथयन्ति। तस्मात् धर्मस्य लोपः कदापि न कार्यः। येन धर्मस्य लोपः क्रियते सः वृषलः अर्थात् निन्दनीयो भवति।

17. एक एव सुहृद् धर्मो निधनेप्यनुयाति यः।

शरीरेण समं नाशं सर्वमन्यद्धि गच्छति।।

**अन्वयः**

धर्म एक एव सुहृत् यः निधने अपि अनुयाति, अन्यत् सर्वं हि शरीरेण समं नाशं गच्छति। **व्याख्या**

धर्मस्य प्राधान्यं उक्त्यन्तरेण प्रस्तूयते। केवलं धर्म एव मृत्योरनन्तरमपि मानवमनुवर्तते। सामान्यतः सुहृदः केवलं मृत्युकालपर्यन्तमेव सहचारिणो भवन्ति, एवमेव कलत्रपुत्रादयः। किन्तु शरीरनाशकाले धर्मोƒ पि मानवमनुगच्छति, अत पूर्णरूपेण धर्ममार्गमेवानुसरणीय इति भावः।

18. पादोƒधर्मस्य कर्तारं पादः साक्षिणमृच्छति।

पादः सभासदः सर्वान् पादो राजानमृच्छति।।

**अन्वयः**

अधर्मस्य पादः कर्तारं, पादः साक्षिणं ऋच्छति। सर्वान् सभासदः पादः, राजानं पादः ऋच्छति।

**व्याख्या**

नीतिन्यायव्यवहारावसरे यदि अधर्मः क्रियते तस्याधर्मस्य फलं सर्वैरनुभोक्तव्यं भवति। अस्याधर्मफलस्य चतुर्थांशं व्यवहारकारिणं बाधते, द्वितीयः पादः साक्षिणं ग्रसते, तृतीयः पादः न्यायाधिपेनानुभोक्तव्यः चतुर्थपादस्य भोक्ता राजा च भवति।

19. राजा भवत्यनेनास्तु मुच्यन्ते च सभासदः

एनो गच्छति कर्तारं निन्दार्हो यत्र निन्द्यते।।

**अन्वयः**

यत्र निन्दार्हः निन्द्यते (तत्र) राजा तु अनेनाः भवति, सभासदः च मुच्यन्ते, एनः कर्तारं गच्छति।

**व्याख्या**

यस्मिन् न्यायालये अपराधी दण्डार्ह दण्ड्यते तत्र राजा निष्पापी भवति। अपि च व्यवहारस्य न्यायान्यायविवेचनं कुर्वतः न्यायाधीशा अपि निर्दोषिणो भवन्ति। दण्डनीयप्रवृत्तेः पापः केवलमपराधिनमेव बाधते।

20. जातिमात्रोपजीवी वा कामं स्याद्ब्राह्मणब्रुवः।

धर्मप्रवक्ता नृपतेर्न तु शूद्रः कथञ्चन।।

**अन्वयः**

जातिमात्रोपजीवी ब्राह्मणब्रुवः वा नृपतेः धर्मप्रवक्ता कामं स्यात्, शूद्रः तु कथञ्चन न।

**व्याख्या**

यः जन्मना एव ब्राह्मणो भवति अथवा 'अहं ब्राह्मणः अस्मि इति यः वदति सोऽपि राज्ञः धर्मनिर्णयकर्तृरूपेण नियोजने योग्यो भवति। किन्तु कदापि शूद्रः धर्मनिर्णये न नियोज्यः। यदि धर्मनिर्णये, योग्यो ब्राह्मणो न लब्धः तर्हि क्षत्रियो वैश्यो वा धर्मनिर्णयं कर्तुमर्हति। धर्मनिर्णये शूद्रस्य निषेध्ः अत्र प्रतिवाद्यते। योग्येन पुरुषेण धर्मनिर्णयः कार्य इत्यर्थः।

21. यस्य शूद्रस्तु कुरुते राज्ञो धर्मविवेचनम्।

तस्य सीदति तद्राष्ट्रं पङ्के गौरिव पश्यतः।।

**अन्वयः**

यस्य राज्ञः धर्मविवेचनं शूद्रः कुरुते तस्य तद्राष्ट्रं तु पङ्के गौः इव पश्यतः सीदति

**व्याख्या**

यस्मिन् राज्ये शूद्रः धर्मविवेचनं करोति तत्तस्य राष्ट्रस्य नाशकारणं भवति। यथा पङ्के पतिता गौः पश्यत एव अधोधो गत्वा नाशमभ्येति तथा शूद्रस्य धर्मविवेचने राष्ट्रस्य नाश एव भवति इत्याशयः। शूद्रशब्देन अयोग्य इत्येवार्थः स्वीकरणीयः।

22. यद्राष्ट्रं शूद्रभूयिष्ठं नास्तिकाक्रान्तमद्विजम्।

विनश्यत्याशु तत्कृत्स्नं दुर्भिक्षव्याधिपीडितम्।।

**अन्वयः**

यत् राष्ट्रं शूद्रभूयिष्ठं नास्तिकाक्रान्तं अद्विजं दुर्भिक्षव्याधिपीडितं तत् कृत्स्नं आशु विनश्यति।

**व्याख्या**

यस्मिन् राष्ट्रे शूद्राः बाहुल्येन वर्तन्ते तथा वेदनिन्दका नास्तिकाः भवन्ति, एवं द्विजा विरला भवन्ति तद्राष्ट्रं दुर्भिक्षेण रोगेण च संबाध्य शीघ्रमेव नाशमभ्येति। सज्जनाभावे राष्ट्रस्य नाश एव भवतित्यर्थः।

23. धर्मासनमधिष्ठाय संवीताङ्गः समाहितः।

प्रणम्य लोकपालेभ्यः कार्यदर्शनमारभेत्।।

**अन्वयः**

संवीताङ्गः धर्मासनमधिष्ठाय समाहितः लोकपालेभ्यः प्रणम्य कार्यदर्शनं आरभेत्।

**व्याख्या**

कार्यदर्शनावसरे राजा यथायोग्यं ललितरूपेण वस्त्राभूषणादिकं धृत्वा धर्मासने उपविश्य लोकपालकान् सम्यक् मनसि निधाय एकाग्रचित्तेन कार्यविचारः करणीयः। कार्याणां न्यायान्यायविवेचनार्थं चित्तैकाग्र्यं अनिवार्यमेव।

विक्षिप्तचित्तानां कृते कार्याकार्यविवेचनं दुष्करं भवति।

24. अर्थानर्थावुभौ बुद्ध्वा धर्माधर्मौ च केवलौ।

वर्णक्रमेण सर्वाणि पश्येत् कार्याणि कार्यिणाम्।।

**अन्वयः**

उभौ अर्थानर्थौ केवलौ धर्माधर्मौ च बुद्ध्वा कार्यिणां सर्वाणि कार्याणि वर्णक्रमेण पश्येत्।

**व्याख्या**

केवलं श्रेयस्करः दोषकरः, धर्मः अधर्मः इत्यादीन् परिगणय्यैव कार्यार्थिनां कार्याणि विचारणीयानि भवन्ति। कार्यार्थिषु विविधवर्णजास्सन्ति चेत् वर्णक्रमेण अर्थात् प्रथमं ब्राह्मणः अनन्तरं क्षत्रियः तथा वैश्यशूद्रौ इति क्रमेण कार्याणि पश्येत्।

25. बाह्यैर्विभावयेल्लिङ्गै भावमन्तर्गतं नृणाम्।

स्वरवर्णेङ्गिताकारैश्चक्षुषा चेष्टितेन च।।

**अन्वयः**

स्वरवर्णेङ्गिताकारैः बाह्यैः लिङ्गैः चक्षुषा चेष्टितेन च नृणां अन्तर्गतं भावं विभावयेत्।

**व्याख्या**

सभायां व्यवहारार्थमागतानां जनानां भाषणे स्वरभेदः, वैवर्ण्यादयः, अधोमुखादिचेष्टादयः, कम्पस्वेदरोमाञ्चदयश्च दृष्ट्वा वादिप्रातिवादिनां मनसि यो विचारोऽस्ति स ज्ञातव्यः। एतत्सम्य गवबुद्ध्य एव कार्याकार्येषु निर्णयः करणीयः। केवलं वादिप्रतिवादिनां भाषणं श्रुत्वा निर्णयो न करणीय इत्यर्थः।

26. आकारैरिङ्गितैर्गत्या चेष्टया भाषितेन च।

नेत्रवक्त्रविकारैश्च गृह्यतेऽन्तर्गतं मनः।।

**अन्वयः**

आकारैः इङ्गितैः गत्या चेष्टया भाषितेन च नेत्रवक्त्रविकारैः च मनः अन्तर्गतं गृह्यते।

**व्याख्या**

पूर्वोक्तश्लोकमेवानुवर्तते। वादिप्रतिवादिभिः सभायां यदुच्यते तत्सत्यं वा असत्यं वेत्यवगन्तुं तेषां रोमाञ्चादिस्वभावः, अधोमुखीकरणं, चलने गतिभङ्गः, नेत्रयोः विकारः, दृष्टिचापल्यं, सम्भ्रम इत्यादीनि विकाराणि द्रष्टव्यानि सन्ति। एतत्सर्वं सम्यक् निरीक्ष्यैव वादविवादेषु निर्णयः करणीयः।

27. बालदायादिकं रिक्थं तावद् राजानुपालयेत्।

यावत् स स्यात् समावृत्तो यावच्चातीतशैशवः।

**अन्वयः**

रिक्थं बालदायादिकं तावत् राजा अनुपालयेत् यावत् सः समावृत्तः यावत् अतीतशैशवः च स्यात्।

**व्याख्या**

अनाथस्य बालस्य पैतृकं सम्पत् राज्ञा परिपालनीयम्। यावत्पर्यन्तं विद्याभ्यासपरिपूर्तिः अथवा समावर्तनञ्च भविष्यति अथवा तेन शैशवावस्था यावदतीता तावत् तस्य सम्पत्तेः संरक्षणं राज्ञ कर्तव्यं भवति। कदाचित् तत्सम्पत्तेरपहरणं अन्ये बान्धवाः कुर्यात् अतः बाल्यावस्थापूर्तिपर्यन्तं राजा एव तस्य पितृदायस्य रक्षकः स्यात्। षोडशवर्षपर्यन्तं बाल्यावस्था कथ्यते।

28. वशाfपुत्रासु चैवं स्याद् रक्षणं निष्कुलासु च।

पतिव्रतासु च स्त्रीषु विधवास्वातुरासु च।।

**अन्वयः**

एवं वशा,अपुत्रासु च निष्कुलासु च पतिव्रतासु स्त्रीषु च विधवासु आतुरासु च रक्षणं स्यात्।

**व्याख्या**

अनाथस्य बालस्य धनादिकं यथा राजा रक्षेत् तथैव वन्ध्यानां, पुत्ररहितानां, कुलरहितानां, पतिव्रतानां, विधवानां, आतुरस्त्रीणां च सम्पदां रक्षणं राज्ञः कर्तव्यं भवति। अस्य सम्पदः अपहरणं केनापि प्रकारेण न भवेदित्याशयः।

29. जीवन्तीनां तु तासां ये तद्धरेयुः स्वबान्धवाः।

ताञ्छिष्याच्चौरदण्डेन धार्मिकः पृथिवीपतिः।।

**अन्वयः**

जीवन्तचीनां तु तासां तत् ये स्वबान्धवाः हरेयुः, धार्मिकः पृथिवीपतिः तान् चौरदण्डेन शिष्यात्।

**व्याख्या**

जीवन्तीनां उपर्युक्तानां आसां स्त्रीणां तत्सम्पदां ''अहमेषां परिपालनं करिष्यामी''त्युक्त्वा केचित् स्वबान्धवाः अपहरणं कुर्यात्। ये बान्धवाः एवमेषां सम्पदां, अपहरणं कुर्वन्ति तान् चौरानिव परिगणय्य नीतिमान् राजा चौरदण्डेन दण्ड्यात्।

30. प्रनष्टस्वामिकं रिक्थं राजा त्र्यब्दं निधापयेत्।

अर्वाक् त्र्यब्दाद्धरेत् स्वामी परेण नृपतिर्हरेत्।।

**अन्वयः**

प्रनष्टस्वामिकं रिक्थं त्र्यब्दं राजा निधापयेत्। त्र्यब्दात् अर्वाक स्वामी हरेत् परेण नृपतिः हरेत्।

**व्याख्या**

अस्वामिकं यद्वस्तु लभ्यते वर्षत्रयपर्यन्तं तद्वस्तुनो रक्षणं राज्ञा करणीयम्। वर्षत्रयानन्तरं यदि तद्वस्तुनः स्वामी आगच्छेत् तर्हि तस्मै तद्वस्तु दद्यात्। वर्षत्रयानन्तरमपि यदि तद्वस्तुनः स्वामी नागच्छति तर्हि तद्वस्तु राज्ञा स्वीकर्तव्यम्।

31. ममेदमिति यो ब्रूयात् सोनुयोज्यो यथाविधि।

संवाद्य रुपसंख्यादीत् स्वामी तद्रव्यमर्हति।।

**अन्वयः**

यः ममेदमिति ब्रूयात् सः यथाविधि अनुयोज्यः। रूपसंख्यादीन् संवाद्य स्वामी तद्रव्यं अर्हति।

**व्याख्या**

अस्वामिकं द्रव्यमुद्दिश्य इदं मम द्रव्यं इत्युक्तवा योऽपि आगच्छति तस्य सम्यक् परीक्षणं कार्यम्। अपि च प्रनष्टस्य वस्तुनः रूपं, संख्या, प्रनष्टस्थानं, देशं कालं इत्यादिकं सम्यक् संशोध्यैव तद्रव्यं तस्य स्वामिने दातव्यम्।

32. अवेदयानो नष्टस्य देशं कालञ्च तत्त्वतः।

वर्ण रूपं प्रमाणञ्च तत्समं दण्डमर्हति।।

**अन्वयः।**

नष्टस्य देशं कालं च वर्णं रूपं प्रमाणञ्च तत्त्वतः अवेदयानः तत्समं दण्डं अर्हति।

**व्याख्या**

अस्मिन् विषये प्रनष्टस्य द्रव्यस्य रूपं, परिमाणं, देशं, कालं, वर्ण इत्यादिविषयान् तत्त्वतः वक्तुं योऽसमर्थो भवति स तस्य यथार्थस्वामी न भवति। तस्य कृते तद्रव्यस्य यावत् मूल्यं भवति तत्समं द्रव्यं दण्डरूपेण तस्मात् स्वीकर्तव्यम्।

33. आददीताथ षट्भागं प्रनष्टाधिगतान्नृपः।

दशमं द्वादशं वापि सतां धर्ममनुस्मरन्।।

**अन्वयः**

अथ प्रनष्टाधिगतात् षट्भागं दशमं द्वादशं वापि सतां धर्मं अनुस्मरन् नृपः आददीत

**व्याख्या**

प्रनष्टलब्धस्य द्रव्यस्य स्वामी यदा आगच्छति तदा तं सम्यक् परीक्ष्य द्रव्यं दातव्यम्। तत्पूर्वं तद्रव्यस्य षट्भागं दशमांशं द्वादशांशं वा राजा स्वीकर्तुं शक्यते। यदि द्रव्यस्य स्वामी सज्जनो भवति तर्हि द्रव्यस्य दशमांशं द्वादशांशं वा स्वीकरणीयम्, नो चेत् षट्भागं राजा स्वीकुर्यात्।

34. प्रनष्टाधिगतं द्रव्यं तिष्ठेद्युक्तैरधिष्ठितम्।

यास्तत्र चौरान् गृहणीयात् तान् राजेभेन घातयेत्।।

**अन्वयः**

प्रनष्टाधिगतं द्रव्यं युक्तैराधिष्ठितं तिष्ठेत्। याः तत्र गृह्णी्यात् तान् चौरान् राजा इभेन घातयेत्।

**व्याख्या**

प्रनष्टलब्धस्य द्रव्यस्य संरक्षणे विश्वस्तपुरुषाः नियोज्याः। कुत इति चेत् तद्रव्यं यदि पुनःनष्टं भविष्यति तदा राज्ञः यशो/पि मलिनीभवति। नष्टद्रव्यस्य पालकेषु यः कोपि तद्रव्यचोरणे उद्युक्तो भवति तं चोरं पातकिनमिव विगणय्य राजा हस्तिना घातयेत्। तस्मै मृत्युदण्डमेव दातव्यमित्यर्थः

35. ममायमिति यो ब्रूयान्निधिं सत्येन मानवः।

तस्याददीत परभागं राजा द्वादशमेव वा।।

**अन्वयः**

यः मानवः निधिं ममायामिति सत्येन ब्रूयात् राजा तस्य षट्भागं द्वादशमेव वा आददीत।

**व्याख्या**

प्रनष्टलब्धद्रव्यविषये यः अहमस्य द्रव्यस्य स्वामी अस्मीति सत्येन वदति तस्मै तन्निधिं दद्यात्।तत्पूर्वं तान्निधेः षट्भागं द्वादशभागं वा राजा स्वीकुर्यात्। यदि निधेः स्वामी सज्जनो भवति तर्हि तस्य द्वादशभागमेव स्वीकुर्यात्। यदि स उद्धतो दुर्जनश्च भवति तर्हि षट्भागं स्वीकरणीयम्।

36. अनृतं तु बदन् दण्ड्यः स्ववित्तस्यांशमष्टमम्।

तस्यैव वा निधानस्य संख्ययाल्पीयसीं कलाम्।।

**अन्वयंः**

अनृतं वदन् तु स्ववित्तस्य अष्टमं अंशं तस्यैव निधानस्य संख्यया अल्पयसीं कलां वा दण्डयः।

**व्यख्या**

निधानस्यास्य स्वामी अहमेवेति यः छलभाषणं करोति तस्य सम्पदः अष्टमांशं दण्टशुल्करूपेण स्वीकुर्यात्, अथवा तस्यैव निधानस्य अल्पभागं दण्डरूपेण गृह्णीयात्। छलभाषी धनिको भवति चेत् सम्पदः अष्टमांशं दरिद्रः चेत् निधानसंख्याया अल्पभागं स्वीकरणीयम्।

37. विद्वांस्तु ब्राह्मणो दृष्ट्वा पूर्वोपनिहितं निधिम्।

अशोषतोऽप्याददीत सर्वस्याधिपतिर्हि सः।।

**अन्वयः**

विद्वान् ब्राह्मणः तु पूर्वोपनिहितं निधिं दृष्ट्वा अशोषतः अपि आददीत हि सः सर्वस्य अधिपतिः (भवति)

**व्याख्या**

निधानद्रव्यं यदि ब्राह्मणेन दृष्टं तर्हि स तद्रव्यं पूर्णतः आदातुं शक्यते। तेषु षट्भागं द्वादशभागं वा न देयमस्ति। कुत इति चेत् ब्राह्मणः सवस्वाधिकारी भवति। तदानीन्तने काले राजानामपि पूजनीयो भवति ब्राह्मणः। अतः तस्य निधौ पूर्णाधिकारः परिकल्पितः।

38. यं तु पश्येन्निधिं राजा पुराणं निहितं क्षितौ।

तस्माद् द्विजेभ्यो दत्वार्धमर्धं कोशे प्रवेशयेत्।।

**अन्वयः**

राजा तु पुराणं क्षितौ निहितं यं निधिं पश्येत् तस्मात् अर्धं द्विजेभ्यो दत्वा अर्धं कोशे प्रवेशयेत्।

**व्याख्या**

पुरातनकाले येन केनाति पुरुषेण भूमौ निहितं निधिं यदा राजा पश्यति तदा स राजा तन्निधेः अर्धभागं दानरूपेण ब्राह्मणेभ्यो दत्वा अवशिष्टं अर्धभागं राजभण्डागारे प्रवेशयेत्। निधेः कोपि स्वामी यदि नास्ति तर्हि तस्य दुरुपयोगो भवितुं शक्यते। तन्निवारणर्थमेवायमुपायः।

39. निधीनां तु पुराणानां धातूनामेव च क्षितौ।

अर्धभाग् रक्षणाद् राजा भूमेरधिपतिर्हि सः।।

**अन्वयः**

पुराणानां तु निधीनां क्षितौ धातूनां च रक्षणात् अर्धभाग राजा एव। हि सः भूमेः अधिपतिः।

**व्याख्या**

अस्वामिनां निधीनां भूमौ निहितानां अथवा भूमेरन्तर्भागे स्थितानां सुवर्णादि धातूनां अर्धभागस्य अधिकारि राजा भवति। कुत इति चेत् स राजा एव भूमेः रक्षां करोति। भूमेरधिपतिरपि राजा एव भवति।

40. दातव्यं सर्ववर्णेभ्यो राज्ञा चौरैर्हृतं धनम्।

राजा तदुपयुञ्जानश्चौरस्याप्नोति किल्बिषम्।।

**अन्वयः**

चौरैर्हृतं धनं राज्ञा सर्ववर्णेभ्यो दातव्यम्। तदुपयुञ्जानः राजा चौरस्य किल्बिषं आप्नोति।

**व्यख्या**

यदा चोरैरपहृतं धनं राज्ञः सकाशमागच्छति तद्धनस्य स्वामी अज्ञातश्च भवति तदा तद्धनं राज्ञा एव सर्वेभ्यो वर्णेभ्यः दातव्यम्। न तु केवलं ब्राह्मणेभ्यः। यदि लोभावेशवशात् राजा तद्धनमुपयुञ्जानः तर्हि चौरप्रवृत्तेः समं पापं राजानमपि बाधते, अपहृतस्य धनस्य उपयोगः राज्ञा कदापि न करणीयः।

41. जातिजानपदान् धर्मान् श्रेणीधर्मांश्च धर्मवित्

समीक्ष्य कुलधर्मांश्च स्वधर्मं प्रतिपादयेत्।।

**अन्वयः**

जातिजानपदान् धर्मान् श्रेणीधर्मान् च कुलधर्मान् च समीक्ष्य धर्मवित् स्वधर्मं प्रतिपादयेत्।

**व्याख्या**

धर्मनिर्णयावसरे राजा कान् कान् विषयान् संशोधयेत् इति प्रतिपादयति। व्यवहारार्थमागतानां जातिः का, को देशः श्रेणी कुलं इत्यादि विषयान् पश्येत्। एषां धर्ममनुसृत्यैव व्यवहारे विधिनिर्णयः करणीयः। व्यवहारिणां देशाचारविरुद्धरूपेण विधिनिर्णयो न करणीयः।

42. स्वानि कर्माणि कुर्वाणा दुरे सन्तो/पि मानवाः।

प्रिया भवन्ति लोकस्य स्वे स्वे कर्मण्यवस्थिताः।।

**अन्वयः**

स्वानि कर्माणि कुर्वाणाः मानवाः दूरे सन्तो/पि स्वे स्वे कर्मण्यवस्थिताः लोकस्य प्रिया भवन्ति।

**व्याख्या**

जीवसन्धारणार्थं देशान्तरं गत्वा स्वकुलधर्मं कृत्वा ये जीवनं यापयन्ति, स्वकर्मानुष्ठानतत्पराः ते जनः स्वग्रामीणानां देशान्तरवासिनां च प्रीतिभूता भवन्ति। अर्थात् देशान्तरं गात्वापि ये स्वकुलधर्ममनुसृत्यैव जीवसन्धारणं कुर्वन्ति ते जनानां प्रिया भवन्ति।

43. नोत्पादयेत् स्वयं कार्यं राजा नाप्यस्य पूरुषः।

न च प्रापितमन्येन ग्रसेतार्थं कथञ्चन।।

**अन्वयः**

राजा स्वयं कार्यं न उत्पादयेत् अस्य पूरुषः अपि न, अन्येन कथञ्चन प्रापितं अर्थं च न ग्रसेत।

**व्याख्या**

राजा राजपुरुषो वा विवादस्य प्रेरणां कदापि न दद्यात्। धनलोभात् अन्यकार्यलोभाद्वा व्यवहारास्य प्रेरणां यदि दद्यात् तदपयशःकारणं भवेत्। एवमेव न्यायान्यायविवेचनार्थं अन्येनानीतं व्यवहारं कदापि न त्यजेत्।

44. यथा नयत्यसृक्पातैर्मृगस्य मृगयुः पदम्।

नयेत्तथानुमानेन धर्मस्य नृपतिः पदम्।।

**अन्वयः**

यथा मृगयुः असृक्पातैः मृगस्य पदं नयति तथा नृपतिः अनुमानेन धर्मस्य पदम् नयेत्।।

**अन्वयः**

यथा मृगयुः असृक्पातैः मृगस्य पदं नयति तथा नृपतिः अनुमानेन धर्मस्य पदं नयेत्।

**व्याख्या**

यथा बाणाहतस्य मृगस्य स्थानं तच्छरीरान्निपतितैः रक्तबिन्दुभिः व्याधः प्राप्नोति तथैव राजा व्यवहारिणां भावहावादिनां अनुमानेन धर्मनिर्णयं कुर्यात्। व्यवहारिणां हावभावादिभिः कः अपराधी को निरपराधीति सम्यगनुमीय धर्मनिर्णयः् करणीयः।

45. सत्यमर्थं च सम्पश्येदात्मानमथ साक्षिणः।

देशं रूपं च कालं च व्यवहारविधौ स्थितः।।

**अन्वयः**

अथ व्यवहारविधौ स्थितः सत्यं, अर्थं, आत्मानं साक्षिणः, देशं, रूपं च कालं च सम्पश्येत्।

**व्याख्या**

न्यायान्यायविवेचने स्थितो राजा सर्वदा सत्यमेव सम्पश्येत्। तदर्थं व्यवहारवस्तुनो मूल्यं, स्वकीयं स्वर्गादियशः, सत्यवादिनः साक्षिणः, देशकालौ, व्यवहारस्य स्वरूपं इत्यादिविषयान् सम्यक् संशोधनं कृत्वा एव विधिनिर्णयं कुर्यात्।

46. सद्भिराचरितं यत् स्याद् धार्मिकैश्च द्विजातिभिः।

तद्देशकुलजातीनामविरुद्धं प्रकल्पयेत्।

**अन्वयः**

सद्भिः धार्मिकैश्च द्विजातिभिः यत् आचरितं स्यात् तत् देशकुलजातीनां अविरुद्धं प्रकल्पयेत्।

**व्याख्या**

व्यवहारेषु विधिनिर्णयावसरे पूर्वसूरिभिः विद्वद्भिः धार्मिकैश्च ब्राह्मणैः यो मार्गः स्वीकृतः तमेव मार्गं

स्वीकुर्यात्। अत्र यथा देशकालजातिनियमानां अविरोधः स्यात् तथा व्यवहारनिर्णये पूर्वसूरिणां पन्थानमनुसरेत्।

47. अधमर्णार्थसिद्ध्यर्थमुत्तमर्णेन चोदितः।

दापयेद् धनिकस्यार्थमधमर्णाद् विभावितम्।।

**अन्वयः**

अधमर्णार्थसिद्ध्यर्थं उत्तमर्णेन चोदितः विभावितं धनिकस्य अर्थं अधमर्णात् दापयेत्।

**व्याख्या**

ऋणादानप्रदानविषयाण्येवात्र प्रतिपादयन्ति। ऋणस्य स्वीकर्ता अधमर्णः यदि स्वीकृतस्य ऋणस्य प्रतिदाने कालविलम्बं उपेक्षां वा करोति तदा ऋणदाता उत्तमर्णः तत्प्राप्तुं व्यवहारमाचरति। तद्व्यवहारे प्रसुतानं प्रमाणानां सम्यक् विचारविमर्शं कृत्वा अधर्मर्णात् उत्तमर्णस्य धनं राजा दापयेत्।

48. यैर्यैरुपायैरर्थं स्वं प्राप्नुयादुत्तमर्णिकः।

तैस्तैरुपायैस्संगृह्य दापयेदधमर्णिकम्।।

**अन्वयः**

उत्तमर्णिकः यैः यैः उपायैः स्वं अर्थं प्राप्नुयात् तैः तैः उपायैः अधमर्णिकं संगृह्य दापयेत्।

व्याख्या येन येन मार्गेण अधमर्णात् उत्तमर्णः स्वकीयं धनं प्राप्तुं शक्यते तान् सर्वानपि मार्गानवलम्ब्य राजा अधमर्णात् धनं संगृह्य उत्तमर्णं दापयेत्।

49. धर्मेण व्यवहारेण छलेनाचरितेन च।

प्रयुक्तं साधयेदर्थं पञ्चमेन बलेन वा।।

**अन्वयः**

धर्मेण, व्यवहारेण, छलेन, आचरितेन च, पञ्चमेन बलेन वा प्रयुक्तं अर्थं साधयेत्।

**व्याख्या**

अधमार्णाय दत्तं ऋणं उपर्युक्तेन पञ्चप्रकारेण स्वीकर्तुं शक्यते। तत्र धर्मो नाम उत्तमर्णः स्वसुहृत् द्वारा अधमर्णं सद्वचोभिः अनुनीय स्वीकरणं, व्यवहारः न्यायालये न्यायाधिपस्य पुरतः वादविवादः छलो नाम भूषणादिकं स्वीकृत्य स्ववशे स्थापनम्,

आचरितं नाम यावत् धनं प्राप्नोति तावत्पर्यन्तं अधमर्णस्य गृहे वासः, बलो नाम अधमर्णस्य अथवा तस्य बन्धुजनस्य अजगवादिकस्य वा बन्धनम्। एभिः पञ्चभिरुपायैः अधमर्णात् उत्तमर्णः धनं स्वीकर्तुं शक्यते।

50. यः स्वयं साधयेदर्थमुत्तमर्णोƒधमर्णिकात्।

न स राज्ञाभियोवत्तव्यः स्वकं संसाधयन् धनम्।।

**अन्वयः**

यः उत्तमर्णः अधमर्णिकात् स्वकं धनं  संसाधयन् स्वयं अर्थं साधयेत् स राज्ञा न अभियोक्तव्यः।

**व्याख्या**

यदि ऋणरूपेण दत्तं धनं उत्तमर्णः अधमर्णात् परसाहाय्यं विना प्राप्तुं समर्थो भवति तर्ह्यस्मिन् विषये राजा हस्तक्षेपं न कुर्यात्। स्वधनप्राप्त्यर्थं उत्तमर्णो यदि बलप्रयोगमपि करोति तदापि राजा अस्मिन् विषये विचारविमर्शं न कुर्यात्।

51. अर्थेfपव्ययमानं तु करणेन विभावितम्।

दापयेत् धनिकस्यार्थं दण्डलेशं च शक्तितः।।

**अन्वयः**

करणेन विभावितं तु अर्थे अपव्ययमानं धनिकस्य अर्थं दापयेत्, शक्तितः दण्डलेशं च

**व्याख्या**

यदि अधमर्णेन स्वकीयं आधमर्णिकं निषिद्ध्यते तदाधमर्णिकं प्रमाणैः स्थाप्यते चेत् राजा उत्तमर्णाय तमर्थं दापयेत्। अधमर्णाय तस्य शक्त्यनुसारेण दण्डमपि राज्ञा दातव्यम्। तद्दण्डं दशमांशं तन्यूनं वा भवितुं शक्यते।

52. अपह्नवेfधमर्णस्य देहीत्युक्तस्य संसदि।

अभियोक्ता दिशेत् देश्यं करणं वान्यदुद्दिशेत्।।

**अन्वयः**

देहीत्युक्तस्य अधमर्णस्य संसदि अपह्नवे अभियोक्ता देश्यं दिशेत् अन्यत् करणं वा उद्दिशेत्।

**व्याख्या**

‘उत्तमर्णाय धनं देहीति न्यायालये अधमर्णं प्रति उक्त्वापि यदि अधमर्णेन तान्निषिध्यते तदा न्यायालये न्यायलाभार्थमागत उत्तमर्णः ऋणदानस्य साक्षिणं अथवा अन्यत् किमपि प्रमाणं स्थापयेत्। यात्किमपि प्रमाणं विना ऋणं न देयमित्यर्थः।

53. अदेश्यं यश्च दिशति निर्दिश्यापह्नुते च यः।

यश्चाधरोत्तरानर्थान् विगीतान्नावबुद्ध्यते।।

**अन्वयः**

यः च अदेश्यं दिशति अपह्नुते च यः निर्दिश्य विगीतान् अधरोत्तरान् अर्थान् यः च न अवबुद्ध्यते।

**व्याख्या**

अधमर्णः यस्मिन् देशे कदापि ऋणादानं भवितुं न शक्यते तद्देशं प्रथमं निर्दिश्य पुनः स देशो मया न निर्दिष्ट इति अग्रे वक्ष्यति चेत् स पूर्वापरव्यवहृतस्य वैरुद्ध्यं न अवगन्तुं शक्नोति। एवमेव स व्यवहारे पराजितोऽपि भविष्यति।

54. अपदिश्यपदेश्यं च पुनर्यस्त्वपधावति।

सम्यक्प्रणिहितं चार्थं पृष्टस्सन्नाभिनन्दति।।

**अन्वयः**

अपदेश्यं अपदिश्य च पुनः यः तु अपधावति सम्यक् प्रणिहितं च अर्थं पृष्टः सन् न अभिनन्दति।

**व्याख्या**

व्यवहारे यद्यत् वक्तव्यं भवति तत्तदुक्त्वा अग्रे पुनः तद्विपरीतं यो वक्ष्यति, तथा सम्यक् स्थिरीकृतं स्वमतं न्यायालये यदि न्यायाधिपेन पृष्टः सन् सम्यगुत्तरं यो न दातुं समर्थो भवति सः व्यवहारे पराजितो भविष्यति। अर्थात् किमर्थं साक्षिणामभावे ऋणादानप्रदानं कृतमिति न्यायाधिपस्य प्रश्नस्य उत्तरं यदि सुष्ठु न दद्यात् स पराजितो भविष्यति।

55. असंभाष्ये साक्षिभिश्च देशे सम्भाषते मिथः।

निरुच्यमानं प्रश्नं च नेच्छेद्यश्चापि निष्पतेत्।।

**अन्वयः**

असम्भाष्ये देशे च साक्षिभिः मिथः सम्भाषते यः च निरुच्यमानं प्रश्नमपि न इच्छेत् (सः) च निष्पतेत्।

**व्याख्या**

साक्षिभिः सह भाषणं कर्तुमयोग्ये देशे यः तैस्सह भाषणं करोति, यः तं प्रति अप्रीतिकरं प्रश्नं नेच्छति स व्यवहारे पराजितो भविष्यति। न्यायालये यस्य कस्यापि प्रश्नस्य समाधानं दातुं यः समर्थो न भवति तद्व्यवहारे तस्य पराजयमेव भविष्यतीत्यर्थः।

56. ब्रूहीत्युक्तश्च न ब्रूयादुक्तं च न विभावयेत्।

न च पूर्वापरं विद्यात् तस्मादर्थात् स हीयते।।

**अन्वयः**

'ब्रूहि' इत्युक्तः च न ब्रूयात् उक्तं न विभावयेत् च पूर्वापरं च न विद्यात् तस्मादर्थात् सः हीयते।

**व्याख्या**

स्वकीयं मतं स्थापय इति न्यायाधिपेन उक्तः यः तस्य पुरतः किमपि नोक्त्वा तिष्ठति, तथा स्वयं यदुक्तं

तत्प्रामाणैस्सह प्रमाणीकर्तुं यश्च असमर्थो भवति, अपि च यः स्वकीयं पूर्वभाषितं पश्चाद्भाषितं च सम्यग्रूपेण प्रस्तुतीकर्तुमसमर्थो भवति एते स्वकीयव्यवहारे पराजयमेव प्राप्नोति।

57. साक्षिणः सन्ति मेत्युक्त्वा दिशेत्युक्तो दिशेन्न यः।

धर्मस्थः कारणैरेतैर्हीनं तमपि निर्दिशेत्।

**अन्वयः**

मे साक्षिणः सन्ति इत्युक्त्वा दिश इत्युक्तः यः न दिशेत् तमपि धर्मस्थः एतैः कारणैः हीनं निर्दिशेत्।

**व्याख्या**

ममास्मिन् व्यवहारे साक्षिणः सन्ति इत्यभिधाय, साक्षिणमानयेति न्यायाधिपेनोक्तः पुरुषः यदि साक्षिणं नानयति तर्हि अनेनैव न्यायाधिपः तस्य व्यवहारः व्याजः अलीकश्च भवतीति वदेत्। सः अस्मिन् व्यवहारे पराजितो भवति।

58. अभियोक्ता न चेद् ब्रूयात् बद्ध्यो दण्ड्यश्च धर्मतः।

न चेत्त्रिपक्षात् प्रब्रूयाद्धर्मं प्रति पराजितः।।

**अन्वयः**

अभियोक्ता न ब्रूयात् चेत् धर्मतः बद्ध्यः दण्ड्यश्च, त्रिपक्षात् न ब्रूयात् चेत् धर्मं प्रति पराजितः।

**व्याख्या**

धर्मव्यवहारार्थं न्यायालये आगतः पुरुषः न्यायाधिपेन पृष्टस्य प्रश्नस्य समाधानं स्पष्टतः वदेत्। यदि स नोच्यते स बन्धनयोग्यः दण्डनीयश्च भवति। अयमेवापराधी सार्धैकमासान्तरे यदि सत्यं न ब्रूयात् तर्हि धर्मानुसारेण व्यवहारे स पराजितः इति मन्तव्यम्।

59. यो यावन्निह्नुवीतार्थं मिथ्या यावति वा वदेत्।

तौ नृपेण ह्यधर्मज्ञौ दाप्यौ तद्विगुणं दमम्।।

**अन्वयः**

यः अर्थं यावत् निह्नुवीत यावति वा मिथ्या ्वदेत् तौ अधर्मज्ञौ नृपेण द्विगुणं तत् दमं दाप्यौ।

**व्याख्या**

न्यायालये यदि अधमर्णः उत्तमर्णाय दातव्यस्य धनस्य वास्तवपरिमाणं नोक्त्वा तन्यूनसंख्यां वदति, एवमेव यदि उत्तमर्णः अधमर्णात् प्रापणीयस्य धनस्य यथार्थमात्रां अनुक्त्वा तस्मादाधिकं वदति चेत् तौ द्वावपि अधर्मिणौ भवतः। राजा एताभ्यां द्वाभ्यां उक्तसंख्यायाः द्विगुणं धनं दण्डरूपेण देयम्।

60. पृष्टेपव्ययमानस्तु कृतावस्थो धनैषिणा।

त्र्यवरैः साक्षिभिर्भाव्यो नृपब्राह्मणसन्निधौ।।

**अन्वयः**

कृतावस्थः धनैषिणा पृष्टे अपव्ययमानस्तु नृपब्राह्मणसन्निधौ त्र्यवरैः साक्षिभिः भाव्यः।

**व्यख्या**

अधमर्णाय प्रदत्तं ऋणं प्राप्तुं उत्तमर्णः यदि न्यायालयं गच्छति, तत्र न्यायाधिपेन पृष्टः अधमर्णः ऋणस्वीकारविषये निषेधात्मको भावः स्वीक्रियते तर्हि उत्तमर्णेन, राज्ञा नियुक्तस्य ब्राह्मणस्य पुरतः न्यूनातिन्यूनं सक्षित्रयं दर्शयेत्। एभिः साक्षिभिः अधमर्णस्य ऋणस्वीकारः प्रमाणीकर्तव्यः।

61. यादृशा धनिभिः कार्या व्यवहारेषु साक्षिणः।

तादृशान् सम्प्रवक्ष्यामि यथा वाच्यमृतं च तैः।।

**अन्वयः**

धनिभिः व्यवहारेषु यादृशाः साक्षिणः कार्याः तादृशान् सम्प्रवक्ष्यामि तैः यथा ऋतं वाच्यं च।

**व्याख्या**

ऋणादानप्रदानादिव्यवहारेषु न्यायालये उत्तमर्णेन यादृशाः साक्षिणः स्वमतसंस्थापनार्थं उपस्थापयितव्या तादृशानां साक्षिणां लक्षणमत्र वदिष्यामि। अपि च तैः साक्षिमिः कथं सत्यरूपं साक्ष्यवाचकं वदेयुरित्यपि अत्र प्रस्तूयते।

62 गृहिणः पुत्रिणो मौलाः क्षत्रविट् शूद्रयोनयः।

अर्थ्युक्ता साक्ष्यमर्हन्ति न ये केचिदनापदि।।

**अन्वयः**

गृहिणः, पुत्रिणः, मौलाः क्षत्रविट्शूद्रयोनयः अर्थ्युक्ताः साक्ष्यं अर्हन्ति, अनापदि ये केचित् न।

**व्याख्या**

ऋणादानप्रदानादिषु आर्थिकव्यवहारेषु गृहस्थाः, सन्तानयुक्ताः, तद्देशवासिनश्च क्षत्रियाः वैश्याः शूद्रा वा साक्षिणो भवितुं शक्यते तदपि अर्थिनः इच्छानुसारेण ते साक्ष्यं वदन्ति। उपर्युक्तान् परित्यज्य आर्थिकादिषु व्यवहारेषु ये के चित् पुरुषाः साक्षिणो न भवितुं शक्यते।

63. आप्ताः सर्वेषु वर्णेषु कार्याः कार्येषु साक्षिणः।

सर्वधर्मविदो/लुब्धाः विपरीतांस्तु वर्जयेत्।।

**अन्वयः**

सर्वेषु वर्णेषु आप्ताः, सर्वधर्मविदः अलुब्धाः कार्येषु साक्षिणः कार्याः विपरीतान् तु वर्जयेत्।

**व्याख्या**

ब्राह्मणक्षत्रियवैश्यशूद्रेषु वर्णेषु सत्यवादिनः सर्वधर्ममर्मज्ञाः धनादिषु लोभरहिताः साक्षिणः व्यवहारेषु

नियोज्याः। एषां विपरीतान् कदापि न साक्षिणो भवेयुः। साक्षिणो यदि लुब्धा भवन्ति तर्हि धनलोभात् न्यायालये असत्यभाषणं कुर्यात्। अतः ईदृशः साक्षिणः व्यवहारेषु नोपयोज्याः।

64. नार्थसम्बान्धिनो नाप्ता न सहाया न वैरिणः।

न दृष्टदोषाः कर्तव्या न व्याध्यार्ता न दूषिताः।।

**अन्वयः**

न अर्थसम्बन्धिनः, न आप्ताः, न सहायाः, न वैरिणः, न दृष्टदोषाः न व्याध्यार्ताः, न दूषिताः कर्तव्याः।

**व्याख्या**

ये ये जनाः साक्षिवादने न स्वीकुर्युरिति वदति। धनस्य आदानप्रदानं कुर्वाणः, सुहृदः, परिचारकाः शत्रवः, पूर्वं छलसाक्ष्यमुक्तवन्तः, रोगपीडिताः, विभिन्नैः पातकैः दूषिताश्च साक्षिवादने अविश्वस्ताः अयोग्याश्च भवन्ति। येन केनापि कारणेन एते असत्यभाषणं कुर्यात्।

65. न साक्षी नृपतिः कार्यो न कारुककुशीलवौ।

न श्रोत्रियो न लिङ्गस्थो न सङ्गेभ्यो विनिर्गतः।।

**अन्वयः**

नृपतिः साक्षि न कार्यः, न कारुककुशीलवौ, न श्रोत्रियः, न लिङ्गस्थः न सङ्गेभ्यो विनिर्गतः।

**व्यख्या**

अत्र प्रतिपादिता व्यक्तयः साक्षिणः न भवितुमर्हन्ति। तेषु राजा कदापि साक्षी न भवति कुत इति चेत् व्यवहारस्य विधिकर्ता निर्णायकः स एव भवति। अपि च पाचककारः, नर्तकाः, श्रोत्रियो ब्राह्मणः ब्रह्मचारी, सर्वसंगपरित्यागी सन्यासी च न साक्ष्ये नियोज्याः। स्वकर्तव्यबाहुल्यात् न्यायालयागमने तेषामवकाशो न लभ्यते।

66. नाध्यधीनो न वक्तव्यो न दस्युर्न विकर्मकृत्।

न वृद्धो न शिशुर्नैको नान्त्यो न विकलेन्द्रियः।।

**अन्वयः**

न अध्यधीनः, न वक्तव्यः, न दस्युः न विकर्मकृत्, न वृद्धः न शिशुः, न एकः, न अन्त्यः, न विकलेन्द्रियः।

**व्याख्या**

ये साक्षिणः न भवितुमर्हन्ति तानेव पुनरुच्यते, अत्र परतन्त्रः, लोकनिन्दितः, क्रूरस्वभावयुक्तः, आभिचारादिनिषिद्धकर्माचरणकर्ता, वृद्धाः, बालाः, ज्ञातिबन्धुरहितः अनाथः, अन्त्यजः अथवा विवेकशून्याः चण्डालादयः, विकलाङ्गा इत्यादयः साक्षिस्थाने कर्तुं अयोग्या भवन्ति।

67. नार्तो न मत्तो नोन्मत्तो न क्षुत्तृष्णोपपीडितः।

न श्रमार्तो न कामार्तो न क्रुद्धो नापि तस्करः।।

**अन्वयः**

आर्तो न, न मत्तः, न उन्मत्तः, न क्षुत्तृष्णोपपीडितः, न श्रमार्तः न कामार्तः न क्रुद्धः न तस्करः अपि।

**व्याख्या**

आर्तः उन्मत्तः मदमत्तश्च बुद्धिवैकल्यात् न साक्षिणो भवितुमर्हति। तथा क्षुत्पिपासाश्रमखिन्नाः भक्ष्यपेयादिलोभवशात् असत्यं वक्तुं शक्यते। कामार्ताः विषयसुखलोभात् तस्कराः धनलोभात् वाक्परिवर्तनं कर्तुं प्रभवति। मनो नियन्त्रणाभावात् क्रुद्धः साक्षिस्थाने अयोग्यो भवति।

68. स्त्रीणां साक्ष्यं स्त्रियः कुर्युर्द्विजानां सदृशाद्विजाः।

शूद्राश्च सन्तः शूद्राणामन्त्यानां अन्त्ययोनयः।।

**अन्वयः**

स्त्रियः स्त्रीणां साक्ष्यं कुर्युः द्विजानां सदृशाः द्विजाः. शूद्राणां च सन्तः शूद्राः अन्त्ययोनयः अन्त्यानाम्।

**व्याख्या**

स्त्रीणां मध्ये यो व्यवहारो भवति तत्र स्त्रिय एव साक्षिणो भवितुमर्हति, एवं ब्राह्मणानां व्यवहारे ब्राह्मणा एव साक्षिणः तथा शूद्राणां साक्षिणः शूद्रा भवेयुः अन्त्यजानां चण्डालादिनां साक्षिणः तत्कुलावतंसका एव भवेयुः

69. अनुभावि तु यः कश्चित् कुर्यात् साक्ष्यं विवादिनाम्।

अन्तवैश्मन्यरण्ये वा शरीरस्यापि चात्यये।।

**अन्वयः**

अन्तर्वेश्मनि अरण्ये वा शरीरस्य च अत्यये अपि यः कश्चित् अनुभावी विवादिनां तु साक्ष्यं कुर्यात्।

**व्याख्या**

गृहान्तर्भागे तस्करादिभिः यः कश्चिदपायो जायेत् अथवा वनान्तर्भागे चोरादिभिः अपायो मृत्युर्वा जायते तदा पार्श्ववर्ती यः कोपि पुरुषो भवति तं साक्षिणं कर्तुमर्हति। स दृक्साक्षी अत्यधिकं प्राधान्यमावहति।

70. स्त्रियाप्यसम्भवे कार्यं बालेन स्थविरेण वा।

शिष्येण बन्धुना वापि दासेन भृतकेन वा।।

**अन्वयः**

असंम्भवे स्त्रिया, बालेन, स्थविरेण वा शिष्ये बन्धुना वा दासेन भृतकेन वा अपि कार्यम्।

**व्यख्या**

यदि अनुयोज्याः साक्षिणो न लब्धाः तर्हि स्त्रियः वृद्धाः, बालाः, शिष्याः, बन्धुमित्रादयः परिजनादयश्च साक्षिणो भवितुमर्हति। यैः घटना दृष्टा तैरेव साक्षिणो भाव्यम्।

71. बालवृद्धातुराणां च साक्ष्येषु वदतां मृषा।
जानीयादस्थिरां वाचमुत्सिक्तमनसां तथा।।

**अन्वयः**

बालवृद्धातुराणां साक्ष्येषु मृषावदतां तथा उत्सिक्तमनसां वाचं अस्थिरां जानीयात्।

**व्यख्या**

साक्ष्यवाचकावसरे यदि साक्षिणः बालाः, वृद्धाः, रोगिणः, उद्धतचित्ताश्च भवन्ति एवं ते यदि व्याजं वदन्ति तदा तेषां वाणी कदापि स्थिरा न भवति, तेषां वचने पूर्वापरवैरुद्ध्यमपि भवेत्। अतः एषां वाचं अस्थिरां मत्वा साक्ष्यवादने तान् न स्वीकुर्यात्।

72. साहसेषु च सर्वेषु स्तेयसंग्रहणेषु च।
वाग्द्ण्डयोश्च पारुष्ये न परीक्षेत साक्षिणः।।

**अन्वय**

सर्वेषु साहसेषु च स्तेयसंग्रहणेषु च, वाग्दण्ड़योः पारुष्ये च साक्षिणः न परीक्षेत।

**व्याख्या**

सर्वेष्वपि साहसकर्मसु, चौर्यादि दुष्कर्मेषु परदाराग्रहणे वाक्पारुष्ये परस्परकलहे हस्तचालने च साक्षिणां योग्यता न परीक्षणीया। उपर्युक्तान् अपराधान् यः कोपि पश्यति स एव सक्षी भवितुमर्हति। सः यदि बालो वृद्धो महिला वा भवतु तान् साक्षिणं कुर्यादित्यर्थः।

73. बहुत्वं परिगृह्णीयात् साक्षिद्वैधे नराधिपः।
समेषु च गुणोत्कृष्टान् गुणिद्वैधे द्विजोत्तमान्।।

**अन्वयः**

नराधिपः साक्षिद्वैधे बहुत्वं, समेषु गृणोत्कृष्टान् गुणिद्वैधे द्विजोत्तमान् च परिगृह्णीयात्।

**व्याख्या**

साक्षिणो यदि पूर्वापरविरोधेन साक्ष्यं वदति तर्हि राजा बहुजनमतं स्वीकुर्यात्। यदि एवं साक्षिवादने भेदो दृश्यते तर्हि साक्षिषु ये गुणोत्कृष्टा भवन्ति तेषां वाणी स्वीकरणीया, गुणोत्कृष्टा अपि यदि तुल्यसंख्याका भवन्ति तर्हि तत्र ये केचित् ब्राह्मणश्रेष्ठा भवन्ति तेषां वाचं स्वीकुर्यात्।

74. समक्षदर्शनात् साक्ष्यं श्रवणाच्चैव सिद्ध्यति।

तत्र सत्यं ब्रुवन् साक्षी धर्मार्थाभ्यां न हीयते।।

**अन्वयः**

समक्षदर्शनात् श्रवणाच्चैव साक्ष्यं सिद्ध्यति। तत्र साक्षी सत्यं ब्रुवन् धर्मार्थाभ्यां न हीयते।

**व्याख्या**

साक्षाद् दर्शनेन श्रवणेन च साक्ष्यं अथवा साक्षिवाचनयोग्यत्वं सिद्ध्यति। दृष्टं श्रुतं वा विषयं यः सत्यरूपेण वदति स धर्ममार्गात् न विचलति अपि च दण्डाभावात् तस्य अर्थहानिरपि न भविष्यति

75. साक्षी दृष्टश्रुतादन्यत् विब्रुवन्नार्यसंसदि।

अवाङ्नरकमभ्येति प्रेत्य स्वर्गाच्च हीयते।।

**अन्वयः**

साक्षी दृष्टश्रुतादन्यत् आर्यसंसदि विब्रुवन् प्रेत्य अवाङ्नरकं

अभ्येति। स्वर्गात् हीयते च।

**व्याख्या**

साक्षिणो व्याजभाषणं पापमेवेति वदति। यः साक्षी तेन दृष्टात् श्रुताच्च अन्यत् किमपि व्याजं न्यायालये साक्ष्यरूपेण वदति सः मृत्योरनन्तरं नरके पतिष्यति। स्वर्गं गन्तुं अर्हतापि न लप्स्यति। यदि तेन पूर्वं स्वर्गदायकं किमपि पुण्यं कृतं तदपि अनेन असत्यसाक्ष्येण नष्टमेति।

76. यत्रानिबद्धोfपीक्षेत श्रृ्णुयाद्वापि किञ्चन।

दृष्टस्तत्रापि तद् ब्रूयात् यथा दृष्टं यथाश्रुतम्।।

**अन्वयंः**

अनिबद्धोfपि यत्र किञ्चन ईक्षेत श्रुणुयाद्वा अपि तत्र दृष्टः

तत् यथादृष्टं यथाश्रुतं ब्रूयात्।

**व्याख्या**

यस्य नाम साक्षीणां श्रेण्यां नान्तर्भवति सो fपि यदि न्यायालये पृष्टः तर्हि यत्किञ्चित् तेन दृष्टं श्रुतं वा तत् यथादृष्टं यथाश्रुतं वदेत्। सत्यपरिपालने धर्माचरणे च बद्धश्रद्धः सर्वदा एवमेव कुर्यात्।

77. एकोfलुब्धस्तु साक्षी स्याद् बह्व्यः शुच्योfपि न स्त्रियः।

स्त्रीबुद्धेरस्थिरत्वात्तु दोषैश्चान्येfपि ये वृताः।।

**अन्वयः**

अलुब्धः एकस्तु साक्षी स्यात् स्त्रीबुद्धेरस्थिरत्वात् बह्व्यः शुच्चोf पि स्त्रियः न, ये अन्ये च अपि दोषैः वृताः।

**व्याख्या**

लोभादिदोषरहितो यः कोऽपि साक्षी भवितुं अर्हति। सत्स्वभावयुक्ता अपि स्त्रियः कदापि साक्षी भवितुं नार्हति यतोहि स्त्रियः चञ्चलचित्ता भवन्ति इत्यतः तेषां साक्षिवादने भयाद् लोभाद्वा पूर्वापरवैरुद्ध्यं स्यात्। दुर्व्यवहारादिस्वभावदोषयुक्ता अन्येऽपि जनाः साक्षिणो न भवितुमर्हन्ति।

78. स्वभावेनैव यद् ब्रूयुस्तद् ग्राह्यं व्यावहारिकम्।

अतो यदन्यद् विब्रूयुर्धर्मार्थं तदपार्थकम्।।

**अन्वयं**

स्वभावेन एवं यत् ब्रूयुः तत् व्यावहारिकं ग्राह्यम्। अतः अन्यत् यत् विब्रूयुः तत् धर्मार्थं अपार्थकम्।

**व्याख्या**

साक्षी न्यायालये आगत्य स्वाभाविकरूपेण यत् साक्ष्यं वदति तदेव व्यवहारार्थं स्वीकरणीयम्। येन केनापि कारणेन एतद्विपरीतरूपेण यत्किमपि वदति व्यवहारार्थं तन्निरर्थकमेव भवति। यदि साक्षिणः व्याजं वदन्ति तर्हि भयेन सम्भ्रमेण वा स्वरमेदो भविष्यति। तद्वचनं साक्ष्ये न स्वीकरणीयम्।

79. सभान्तः साक्षिणः प्राप्तानर्थिप्रत्यर्थिसन्निधौ।

प्राड्विवाकोऽनुयुञ्जीत विधिनानेन सान्त्वयन्।।

**अन्वयः**

सभ्न्तः अर्थिप्रत्यर्थिसन्निधौ प्राप्तान् साक्षिणः प्राड्विवाकः सान्त्वयन् अनेन विधिना अनुयुञ्जीत।

**व्याख्या**

सभायां आगतान् साक्षिणः प्रति न्यायाधिपः यदा प्रश्नादिकं पृच्छति तत्पूर्वं तान् सम्यक् सान्त्वनं कृत्वा सौम्यरूपेण अधोनिर्दिष्ट प्रकारं प्रश्नान् पृच्छेत्। साक्षिणां भयसम्भ्रमादिकं निवारयितुं न्यायाधिपेन सौम्या वाणी प्रयोक्तव्या।

80. यद्वयोरनयोर्वेत्थ कार्येऽस्मिंश्चेष्टितं मिथः।

तद् ब्रूत सर्वं सत्येन युष्माकं ह्यत्र साक्षिता।।

**अन्वयः**

अनयोः द्वयोः अस्मिन् कार्ये मिथः चेष्टितं वेत्थ तत्सर्वं सत्येन ब्रूत, हि युष्माकं अत्र साक्षिता।

**व्याख्या**

न्यायालये साक्षिणं प्रति न्यायाधिपस्य उक्तिः एवं भवेत्- अस्मिन् वादविवादे द्वयोरनयोः प्रवृत्तिं यद् भवद्भिः ज्ञातं तत् सत्येन वदत। एतौ द्वौ वादिप्रतिवादिनौ परस्परं किमाचरितवन्तौ इत्यस्मिन् विषये यद् भवद्भिः ज्ञातं तत् वक्तव्यम्। यतो हि अत्र भवानेव साक्षी भवति।

81. साक्ष्ये सत्यं ब्रुवन् साक्षी लोकानाप्नोति पुष्कलान्।

इह चानुत्तमां कीर्तिं वागेषा ब्रह्मपूजिता।।

**अन्वयः**

साक्ष्ये सत्यं ब्रूवन् साक्षी पुष्कलान् लोकान् इह अनुत्तमां कीर्तिं च प्राप्नोति एषा वाक् ब्रह्मपूजिता।।

**अन्वयः**

साक्ष्ये सत्यं ब्रूवन् साक्षी पुष्कलान् लोकान् इह अनुत्तमां कीर्ति च प्राप्नोति एषा वाक् ब्रह्मपूजिता।

**व्याख्या**

सत्यसाक्ष्यस्य प्रयोजनं वदति-न्यायालये साक्षी यदि सत्यं वदति तर्हि स सुखभोगपूर्णं स्वर्गलोकं प्रप्नोति, अपि च अस्मिन् लोके तस्य अनन्यसामान्या कीर्तिरपि लप्स्यति। एषा वाणी ब्राह्मदेवेनापि समादृता भवति।

82. साक्ष्ये*f*नृतं वदन् पाशैर्बद्ध्यते वारुणैर्भृशम्।

विवशः शतमा जातीस्तस्मात् साक्ष्यं वदेदृतम्।।

**अन्वयः**

साक्ष्ये अनृतं वदन् शतमा जातीः विवशः वारुणैः पाशैः भृशं बद्ध्यते तस्मात् ऋतं साक्ष्यं वदेत्।

**व्याख्या**

यदि न्यायालये साक्षी असत्यं वदति सः शतजन्मपर्यन्तं वरुणपाशेन बद्ध्वा अत्यधिकं पीडामनुभवेत्। अतः सर्वदा न्यायालये सत्यमेव साक्ष्ये वक्तव्यम्। साक्षी न्यायालये सत्यमेव ब्रूयुरित्यर्थः।

83. सत्येन पूयते साक्षी धर्मः सत्येन वर्धते।

तस्मात् सत्यं हि वक्तव्यं सर्ववर्णेषु साक्षिभिः।

**अन्वयः**

साक्षी सत्येन पूयते धर्मः सत्येन वर्धते, तस्मात् सर्ववर्णेषु साक्षिभिः सत्यं हि वक्तव्यम्।

**व्याख्या**

न्यायालये सत्यवादनेन साक्षिणो मनः शुद्धं भविष्यति एवं लोके धर्मस्यापि सत्येन वृद्धिर्भविष्यति। अतः सर्ववर्णेषु जातानां कृते सत्यमेव वक्यव्यम्। सत्यसाक्ष्ये वर्णभेदो देशभेदश्च नास्तीत्यर्थः। सत्यसाक्ष्ये पूर्वकृतं पापमप्यपाकरोति।

84. आत्मैव ह्यात्मनः साक्षी गतिरात्मा तथात्मनः।

मावमंस्था स्वमात्मानं नृणां साक्षिणमुत्तमम्।।

**अन्वयः**

आत्मनः साक्षी आत्मा एव तथा आत्मनः गतिः आत्मा नृणां उत्तमं साक्षिणं स्वमात्मानं मा अवमंस्थाः।

**व्याख्या**

स्वकीया साक्षी स्वात्मैव भवति तथा स्वकीयमाश्रयस्थानमपि स्वात्मा एव। अतः मानवानां उत्तमसाक्षी यः आत्मा भवति तस्य अपमानं कदापि न कुर्युः। असत्यसाक्ष्येन अन्यान् वञ्चयितुं शक्यते न स्मात्मानम्। अतः स्वात्मनो विपरीतेन किमपि न वक्तव्यम्।

85. मन्यन्ते वै पापकृतो न कश्चित् पश्यतीति नः।

तांस्तु देवाः प्रपश्यन्ति स्वस्यैवान्तरपूरुषः।।

**अन्वयः**

पापकृतः नः कश्चित् न पश्यतीति मन्यन्ते, तान् तु देवाः स्वस्य अन्तरपुरुष एव प्रपश्यन्ति।

**व्याख्या**

पापकारिणः यः के/पि तान् न पश्यतीति विचिन्त्य पापकर्मान् कुर्वन्ति। किन्तु तान् अष्टदिक्पालकादयो देवाः स्वान्तरात्मा च पश्यन्ति। अतः रहस्यपि पापं न कुर्यादित्यर्थः।

86. द्यौर्भूमिरापो हृदयं चन्द्रार्काग्नियमानिलाः।

रात्रिः सन्ध्ये च धर्मश्च वृत्तज्ञाः सर्वदेहिनाम्।।

**अन्वयः**

द्यौः भूमिः, आपः, हृदयं, चन्द्रार्काग्नियमानिलाः रात्रिः, सन्ध्ये च धर्मः च सर्वदेहिनां वृत्तज्ञाः।

**व्यख्या**

आकाशः, भूमिः, जलं, हृदयं, चन्द्रः, सूर्यः, अग्निः, यमः वायुः प्रभातप्रदोषेति सन्ध्याद्वयं धर्मः एते सर्वप्राणिनां सर्वप्रकाराणि कर्माणि पश्यन्ति, अतः मानवः शुभाशुभरूपेण यं कमपि कार्यं करोति तत् एते सर्वे देवाः प्रपञ्चशक्तयश्च पश्यन्ति, अतः कदापि न पापमाचरणीयम्।

87. देवब्राह्मणसान्निध्ये साक्ष्यं पृच्छेदृतं द्विजान्।

उदङ्मुखान् प्राङ्मुखान् वा पूर्वाह्णे वै शुचिः शुचीन्।

**अन्वयः**

शुचिः देवब्राह्मणसान्निध्ये उदङ्मुखान् प्राङ्मुखान् वा द्विजान् पूर्वाह्णे वै ऋतं साक्ष्यं पृच्छेत्।

**व्याख्या**

न्यायाधिपः कस्यापि देवस्य मूर्तेः ब्राह्मणस्य च समक्षं प्रातःकाले मध्याह्नात् पूर्वं उत्तराभिमुखं पूर्वदिशाभिमुखं वा स्थितान् ब्राह्मणान् (सज्जनान्) वास्तवं साक्ष्यं वक्तुमादिशेत् तत्पूर्वं न्यायाधिपस्तु

स्नानसन्ध्यावन्दनादिकं कृत्वा एव शुचिर्भूय एवं सत्यं साक्ष्यं पृच्छेत्।

88. ब्रूहीति ब्राह्मणं पृच्छेत् सत्यं ब्रूहीति पार्थिवम्।

गोबीजकाञ्चनैर्वैश्यं शूद्रं सर्वैस्तु पातकैः।।

**अन्वयः**

ब्राह्मणं ब्रूहि इति पृच्छेत् सत्यं ब्रूहि इति पार्थिवम्, वैश्यं गोबीजकाञ्चनैः, शूद्रं तु सर्वैः पातकैः।

**व्याख्या**

न्यायालये सत्यं वक्तुं ब्राह्मणो यदि साक्षीभवति तं केवलं ब्रूहि (वद) इति पृच्छेत्। तत्र क्षत्रियो यदि साक्षी भवति तं सत्यं ब्रूहीति पृच्छेत्। यदि असत्यं वदेत् तर्हि गोधान्यसुवर्णादिकं तव नश्यतीति वैश्यं सत्यं वक्तुं आदिशेत्। यदि अनृतं वदति तदा अधोनिर्दिष्टानि सर्वाण्यपि पापानि तव भविष्यतीति शूद्रं पृच्छेत्।

89. ब्रह्मघ्नो ये स्मृता लोका ये च स्त्रीबालघातिनः।

मित्रद्रुहः कृतघ्नस्य ते ते स्युर्ब्रुवतो मृषा।।

**अन्वयः**

ब्रह्मध्नः, स्त्रीबालघातिनः मित्रद्रुहः कृतघ्नस्य च ये ये लोकाः स्मृताः ते मृषा ब्रुवतः ते स्युः।

**व्याख्या**

ब्राह्मणधातकः, स्त्रीघातकः, बालधातकः मित्रवञ्चकः कृतघ्नश्च यान् नरकलोकान् प्राप्नुवन्ति तान् लोकान् असत्यवादिनः त्वमपि प्राप्नोषि। एवं शूद्रस्य मनसि पापभयं उत्पाद्य सत्यं वक्तुं प्रैरयत।

90. जन्मप्रभृति यत् किञ्चित् पुण्यं मद्र त्वया कृतम्।

तत्ते सर्वं शुनो गच्छेद्यदि ब्रूयास्त्वमन्यथा।

**अन्वयः**

भद्र! जन्मप्रभृति चत्किञ्चित् पुण्यं त्वया कृतं यदि त्वं अन्यथा ब्रूयाः तत् सर्वं ते शुनः गच्छेत्।

**व्याख्या**

शूद्रं प्रति न्यायाधिपस्य उक्तिरियम्। हे भद्र, वाल्यादारभ्य यानि यानि पुण्यकर्माणि त्वया कृतानि सन्ति तेषां सर्वेषां फलं यदि त्वं असत्यं वदेः तर्हि तव शुनक एव प्राप्स्यति। तत्फलं त्वं न प्राप्स्यसि। असत्यवादनेन आर्जितं पुण्यफलमपि नष्टं भविष्यतीत्यर्थः।

91. एको/हमस्मीत्यात्मानं यत्वं कल्याण मन्यसे।

नित्यं स्थितस्ते हृद्येषः पुण्यपापेक्षिता मुनिः।।

**अन्वयः**

कल्याण, अहं एकः अस्मीति आत्मानं त्वं यन्मन्यसे पुण्यपापेक्षिता एषः मुनिः ते हृदि नित्यं स्थितः।

**व्याख्या**

हे शुभाचार, अहं एकाकी एवास्मि इति विचिन्त्य यत्किमपि पापं कर्तुं प्रयत्नं मा कुरु। यतोहि तव पुण्यकर्मणां पापकर्मणां च साक्षी सः परमात्मा सर्वदा तव हृदये वसति। सः सर्वं पश्चति तव सत्कर्मस्य दुष्कर्मस्य च फलं त्वमेव भुनक्षि।

92. यमो वैवस्वतो देवो यस्तवैष हृदि स्थितः।

तेन चेदविवादस्ते मा गंगां मा कुरून् गमः।

**व्यख्य**

वैवस्वतो देव एव यमः तव हृदि स्थितः तेन ते अविवादः चेत् गंगां मा कुरून् मा गमः।

**व्यख्या**

यदि सूर्यपुत्रोf यं यमदेवः तव मनसि वर्तते तेन सह तव भिन्नाभिप्रायो नास्ति च तर्हि गंगास्नानस्य तथा पुण्यक्षेत्रस्य कुरुक्षेत्रस्य दर्शनस्य च आवश्यकता ते नास्ति। अर्थात् सत्यवादनशीलं सर्वपापविनाशकं भवति।

93. नग्नो मुण्डः कपालेन भिक्षार्थी क्षुत्पिपासितः।

अन्धः शत्रुकुलं गच्छेद्यः साक्ष्यनृतं वदेत्।

**अन्वयः**

यः साक्षी अनृतं वदेत् नग्नः, मुण्डः, क्षुत्पिपासितः अन्धः कपालेन भिक्षार्थी शत्रूकुलं गच्छेत्।।

**व्याख्या**

साक्षी यदि न्यायालये असत्यं वदति तर्हि स वस्त्रविहीनः, मुण्डितशिरस्कः, क्षुत्पिपासापीडितः अन्धश्च सन् कपालरूपभिक्षाभाजनं गृहीत्वा शत्रोः कुले भीक्षार्थी सन् गच्छेत। असत्यवादिनः साक्षिणः सर्वथा सर्वदा च अधःपतनमेव भविष्यतीत्यर्थः

# MODULE 3

# ईशावास्योपनिषत्

1. ऊँ पूर्णमदःपूर्णमिदं पूर्णात् पूर्ण मुदच्यते।
पूर्णस्य पूर्णमादाय पुर्णमेवावशिष्यते।।

**अन्वयः**

अदः पूर्णं, इदं पूर्णं, पूर्णात् पूर्णम् उदच्यते। पूर्णस्य पूर्णं आदाय पूर्णं एव अवशिष्यते।

**व्याख्या**

सत् चित् तथा आनन्दस्वरूपः तत् परब्रह्म परिपूर्णे भवति। इदं कार्यरूपं जगदपि परिपूर्णं भवति। कुत इति चेत् पूर्णरूपात् परब्रह्मणःपूर्णरूपं जगत् उत्पन्नं भवति। परब्रह्मणःजगत् पृथक् कृत्वा पूर्णरूपपरब्रह्म एव अवशिष्टो भवति।

2. ईशावास्यमिदं सर्वं यत् किञ्च जगत्यां जगत्।
तेन त्यक्तेन भुञ्जीथा मा गृधःकस्यस्वित् धनम्।।

**अन्वयः**

जगत्यां यत् किञ्च जगत्, इदं सर्वं ईशावास्यम्।
तेन त्यक्तेन भुञ्जीथाः, कस्यस्वित् धनं मा गृधः।

**व्याख्या**

इदं पुरोदृश्यमानं अखिलं जगत् परमेश्वरचैतन्येन परिव्याप्तं भवति। अतः सर्वदा हे मानव सर्वेषु विषयेषु त्यागभावेन भवितव्यम् यस्मिन् कस्मिन्नपि विषये महत्वाकांक्षा न करणीया, अलीकाभिमानं मा भावयत, संसारिकपदार्थानामुपभोगः स्वार्थभावं त्यक्त्वा उपेक्षाभावेन करणीयः अनधिकृतरूपेण अन्यस्य कस्यापि धने इच्छा मा कुरु। कस्यापि धनादिकं नापहरणीयमित्यर्थः।

3. कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः।
एवं त्वयि नान्यथेतो/स्ति न कर्म लिप्यते नरे।।

**अन्वयः**

इह कर्माणि कुर्वन् एव शतं समाःजिजीविषेत्।
एवं कर्म त्वयि नरे न लिप्यते इतःअन्यथा न अस्ति।

**व्याख्या**

इह अस्मिन् मानवजीवने शास्त्रविहितान् क्रियाकलापान् विधिवदाचरित्वा तथा ईश्वरार्पितभावनया जीवनं यापयन् शतसंवत्सरपर्यन्तं अस्मिन् संसारे जीवितुं इच्छा करणीया एवं निर्लिप्तभावेन कर्माचारणे हे मानव तव मनुष्यजन्मनि कदापि कर्मबन्धनं न बाधते। एतदन्तरा नास्ति को/पि पन्था येन मानवः क्मबन्धेभ्यः मुक्तिं प्राप्नुयात्।

4. असुर्या नाम ते लोका अन्धेन। तमसाffवृताः।
तांस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः।

**अन्वयः**

(ये). असुर्या नाम लोकाः (वर्तन्ते) ते अन्धेन तमसा आवृताः (सन्ति)।
ये के च आत्महनः जनाः (सन्ति) ते प्रेत्य तान् अभिगच्छन्ति।
एवं कर्म त्वयि नरे न लिप्यते इतःअन्यथा न अस्ति।

**व्याख्या**

संसारे असुर्या नाम लोकः अर्थात् अलसा तमोगुणप्रधाना भवन्ति। ये जानाः परब्रह्मपरमात्मनः तिरस्कारं कुर्वन्ति ते मृत्योरनन्तरं तं तमोबहुलं लोकमेव प्रात्नुवन्ति। अस्यायमाशयः। ये परब्रह्मपरमात्मन उपासनां न कुर्वन्ति ते कदापि परमात्मस्वरूपं प्राप्य सांसारिकदुःखात् मुक्तिं न प्राप्नुवन्ति।

5. तदेजति तन्नैजति तद्दूरे तद्वदन्तिके।
तदन्तरस्य सर्वस्य तदु सर्वस्यास्य बाह्यतः।।

**अन्वयः**

तत् एजति, तत् न एजति, तत् दूरे तत् उ अन्तिके। तत्
अस्य सर्वस्य अन्तः, तत् अस्य सर्वस्य उ बाह्यतः।

**व्याख्या**

तत् परब्रह्मपरमात्मतत्वं कदाचित् चलनात्मकं दृश्यते कदाचित् स्वयं स्थिररूपेण चानुभूयते। कदाचित् स दूरे अर्थात् अज्ञानिभिः सहस्रवर्षात्मकेन तपसाप्यप्राप्यो भवति, तथाप्ययं उपासकानां समीपे एव स्थितो भवति। इदमेवात्मतत्त्वं सम्पूर्णजगतः अन्तः वर्तते एवमेव प्रपञ्चस्य बहिर्भागेf पि अस्य विद्यमानत्वं दृश्यते। अयमात्मा सर्वव्यापी भवतीत्यर्थः।

6. यत्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति।
सर्वभूतेषु चात्मानं ततो न विजुगुप्सते।।

**अन्वयः**

तु यः सर्वाणि भूतानि आत्मनि एव अनुपश्यति, च सर्वभूतेषु आत्मानं (अनुपश्यति) ततः न विजुगुप्सते

**व्याख्या**

य उपासकः प्रपञ्चे विद्यमानानि सर्वाणि वस्तूनि स्वात्मनि पश्यति तथा सर्वेष्वपि चराचरेषु स्वात्मानं च पश्यति सः कस्मिन्नपि विषये नैव घृणामनुभवति। अर्थात् यः सर्वं वस्तु आत्ममयमिति जानन्ति सः कामक्रोधादिभ्यो मुक्तो भवति।

7. यस्मिन् सर्वाणि भूतान्यात्मैवाभूद्विजानतः।
तत्र को मोहः कः शोक एकत्वमनुपश्यतः।।

**अन्वयः**

यस्मिन् विजानतः सर्वाणि भूतानि आत्मा एव अभूत् तत्र एकत्वं अनुपश्यतः कः मोहः कः शोकः?

**व्याख्या**

जीवात्मपरमात्मनोरैक्यं उपासको यदा स्वयमनुभूयते तदा प्रपञ्चे विद्यमानानि सकलचराचरवस्तूनि आत्मस्वरूपेणैव तस्य प्रतिभाति। एवं सर्वेषां वस्तूनामभेदबुद्धिः यदा जायते तत्र लौकिकजीवने विद्यमानानि कामक्रोधादिदोषजातानि कदापि न भवितुं शक्यते।

8. स पर्यगाच्छुक्रमकायमव्रणं अस्नाविरं शूद्धमपापविद्धम्।
कविर्मनीषी परिभूः स्वयम्भू र्याथातथ्यतोƒर्थान् व्यदधाच्छाश्वतीभ्यः समाभ्यः।।

**अन्वयः**

सः पर्यगात् शुक्रं, आकायं, अव्रणं, अस्नाविरं, शुद्धं आपापविद्धम। कविः मनीषी, परिभूःस्वयम्भू याथातथ्यतः अर्थान् वि अदधात् शाश्वतीभ्यःसमाभ्यः।

**व्याख्या**

परमात्मस्वरूपमस्मिन् मन्त्रे वर्णितम्। स परमात्मा सर्वासु दिक्षु परिव्यापृतो भवति। आकाश इव सर्वत्र स्वकीयं सान्निद्ध्यं दर्शयति, एवं स आत्मा ज्योतिष्मान् दीप्रस्वरूपश्च भवति, स शरीररहितः सूक्ष्मशरीरादन्यो भवति, तस्य कोƒपि क्षतो नास्ति, स्नायुसंस्थानमपि तस्मिन् न विद्यते अतः अस्नाविरमित्युक्तम्। अत एवायं पञ्चभूतात्मको न भवति । पूर्णरूपेण स्वच्छनिर्मलयुक्तः सः पापराहितः, सर्वसाक्षी, सर्वज्ञ;, सर्वनियन्ता, स्वयमुत्पन्नः आनादिः तथा संवत्सरनामकस्य प्रजापतेः यथायोग्यं वर्णनाविषयो भवति।

9. अन्धं तमः प्रविशन्ति योƒविद्यामुपासते।
ततो भुय इव ते तमो य उ विद्यायां रताः।

**अन्वयः**

ये अविद्यां उपासते, अन्धं तमः प्रविशन्ति ये विद्यायां रताः ते तव उ भूय इव तमः प्रविशन्ति।।
ते तत उ भूय इव तमः प्रविशान्ति।।

**व्याख्या**

यः अविध्धां उपासते अर्थात् विद्यां परित्यज्य सर्वदा केवलं लौकिकसुखप्रदायंक कर्म एवाचरति सः अज्ञानरूपान्धकारे विलीनो भवति। अपि च ये विद्यायां रतः अर्थात् स्वकीयान् कर्तव्यान् परित्यज्य केवलं ज्ञानमार्गे एव गच्छन्ति ते ततोƒप्यधिके गहनान्धकारे प्रविशन्ति। तेषां मुक्तिः कदापि न भविता। अस्यायमाशयः- ज्ञानसम्पादनेन सह स्वकर्मानुष्ठानमपि परब्राह्मोपासकेन करणीयम्

10. अन्यदेवाहुर्विद्ययाƒन्यदाहुरविद्यया।
इति शुश्रुम धीराणं ये नस्तद्विचचक्षिरे।।

**अन्वयः**

विद्यया अन्यत् एव आहु; अविद्यया अन्यत् (एव) आहुः। इति धीराणां शुश्रुम, ये नः तत् विचचश्रिरे।

**व्याख्या**

विद्यया देवताज्ञानावगमेन देवलोकप्राप्तिः, अविद्यया कर्मणा च पितृलोकप्राप्तिश्च भवतीति विद्याf विद्योपासनानां फलमुक्तम् आत्मसाक्षात्कारं प्राप्तानां धीराणां अयमेवानुभव इति तेभ्य इदमशृणोत्। ये विद्वासः विषयमिमं सम्यगवगतवन्तो भवन्ति। अत्र विद्याोपासनायाः अविद्योपासनायाश्च फलमुक्तम्।

11. विद्यां चाविद्यां च यस्तद्वेदोभयं सह।
अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते।।

**अन्वयः**

यः तत् विद्या च अपिद्य च उभयं सह वेद (सः) अविद्यया मृत्युं तीर्त्वा विद्यया अमृतं अश्नुते।।

**व्याख्या**

अत्र विद्या देवताज्ञानात्मिका भवति अविद्या अग्निहोत्रादिकं कर्म च भवति। यः बुद्धिमान् देवताज्ञानात्मिकां विद्यं अग्निहोत्रादिकर्मात्मिकां अविद्याञ्च सम्यक् अवबुद्ध्य अविद्यया मृत्युशब्दवाच्यं स्वभाविकं कर्म तथा ज्ञानञ्च तरणं कृत्वा विद्यया देवताज्ञानेन देवात्मकत्वं अथवा अमरत्वं प्राप्नोति।

12. अन्धं तमः प्रविशन्ति येf सम्भूतिमुपासते।।
ततो भूय इव ते तमो य उ सम्भूत्यां रतः।।

**अन्वयः**

ये असम्भूतिं उपासते (ते) अन्धं तमः प्रविशन्ति। ये सम्भूत्यां रताः ते ततः उ भूयः इव तमः (प्रविशन्ति)।

**व्याख्या**

यो मानवः प्रापञ्चिकवस्तूनां कारणभूतां प्रकृतिं उपासते सःघोरे अज्ञानरूपान्धकारे विलीनो भविष्यति। ये मानवाः कार्यरूपेषु प्रापञ्चिकपदार्थेषु अत्यधिकमासक्ता भवन्ति ते प्रथमोक्तजनानपेक्ष्य अधिकतरे घोरान्धकारे अज्ञाने प्रविशन्ति।

13. अन्यदेवाहुः सम्भवात् अन्यदाहुरसम्भवात्।
इति शुश्रुम धीराणां ये न स्तद्विचचश्रिरे।।

**व्याख्या**

सम्भवात् सम्भूतेः अर्थात् कार्यब्रह्मोपासनात् अणिमाद्यैश्वर्यादिलक्षणं फलमाख्यातवन्तः तथा चासम्भवाद् अर्थात् अव्याकृतप्रकृतेरुपासनारूपात् असम्भूतेःप्रापं फलं अन्यत् भवति। सम्भूत्यसम्भूत्योःफलं सम्यगवगता विद्वांसः अस्मभ्यं एतत् सम्यक् व्याख्याकृतम्।

14. सम्भुतिं च विनाशं च यस्तद्वेदोभयं सह।
विनाशेन मृत्युं तीर्त्वा सम्भूत्यामृतमश्नुते।।

**अन्वयः**

यः सम्भूतिं च विनाशं तत् उभयं सह वेद, (सः) विनाशेन मृत्युं तीर्त्वा संम्भूत्या अमृतं अश्नुते।

**व्याख्या**

यो मानवः उपर्युक्तं सम्भूतिं तथा विनाशशीलं कार्यं च एतदुभयं सममेव विजानतः स विनाशशीलस्या कार्यस्य उपासनया अनैश्वर्यादि मृत्युं तरणं कृत्वा कारणभूतायाः प्राकृतेरुपासनया प्रकृतिलयरूपं अमरत्वं प्राप्नोति।

15. हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम्।
तत्त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये।।

**अन्वयः**

हिरण्मयेन पात्रेण सत्यस्य मुखं आपिहितम्। हे पूषन् सत्यधर्माय दृष्टये त्वं तत् अपावृणु।

**व्याख्या**

स्वर्णवर्णिमेन पात्रेण सत्यस्य अर्थात् आदित्यमण्डलस्थस्य ब्रह्मणः मुखं अथवा तत्प्राप्तेर्द्वारं आच्छादितम्। हे सर्वेषां पोषक, सत्यधर्माय अर्थात् सत्यस्वरुपस्य भवतः उपासकाय मह्यं परमात्म प्राप्त्यर्थं तमावरणं निवर्तय। अज्ञानान्धकारं निवार्य परमात्मतत्वं मह्यं प्रयच्छतेत्यर्थः।

16. पूषन्नेकर्षे यम सूर्य प्राजापत्यव्यूह रश्मीन् समूह।
तेजो यत्ते रूपं कल्याणतमं तत्ते पश्यामि।
यो/सावसौ पुरुषः सो/हमस्मि।

**अन्वयः**

है पूषन्, एकर्षे, यम, सूर्य, प्रजापत्य, रश्मीन् व्यूह, तेजःसमूह, यत् ते कल्याणतमं रूपं तत् ते पश्यामि। यः असौ पुरुषः, अहं सः अस्मि।

**व्याख्या**

हे जगतः पोषक, सर्वलोकनियन्तः, एकाकीभूत्वा गमनशील, रसशोषक, सूर्य, प्रजापतिसुत, भवान स्वकीयं तीक्ष्णरश्मिसमूहं संयमत। एवं भवतां तेज एकत्रैव योजयत, येनाहं तव कल्याणतममत्यन्तशोभनं रूपं पश्यामि। यतो/हं आदित्यमण्डलस्थः पुरुष अर्थात् परमात्मा एवास्मि। अहं ब्रह्मास्मीति महावाक्यमत्र स्मरणीयम्।

17. वायुरनिलमभृतमथेदं भस्मान्तं शरीरम् ऊँ क्रतो स्मर कृतं स्मर क्रतो स्मर कृतं स्मर।

**अन्वयः**

अथ वायु; अमृतं अनिलं (प्रविशतु) इदं शरीरं भस्मान्तं (भुयात्) क्रतो स्मर, कृतं स्मर, क्रतो स्मर, कृतं स्मर।

**व्याख्या**

अथेदानीं मम मरणवसरे मम शरिरे विद्यमानो वायुः प्राणः जिवात्मानं परित्यज्य परमात्मरूपं अमृतं अनिलं प्रविशतु। अनन्तरं मम शरीरं अग्नौ भस्मीभूतं भवतु। हे संकल्पात्मक मम मनः, यद्यत् कर्म गुणदोषात्मकं त्वया कृतं तत् स्मर । हे मनः यावज्जीवं त्वया कृतं कर्म पर्यालोचय तस्य विचारविमर्शं कुरु।

18. अग्ने नय सुपथा राये अस्मान् विश्वानि देव वयुनानि विद्वान्।
यूयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नम उक्तिं विधेम।।

**अन्वयः**

(हे) अग्ने अस्मान् राये सुपथा नय, देव, विश्वानि वयुनानि विद्वान् अस्मात् जुहुराणं एन' युयोधि, तेभूयिष्ठां नम उक्तिं विधेम।

**व्याख्या**

सर्वानपि पापान् नाशयित्वा सन्मार्गगमनार्थं अग्निं प्रार्थयते हे अग्ने भवद्भक्तान् अस्मान् स्वकर्मफलभोगाय सन्मार्गेण नय। हे देव भवान् अस्माकं सर्वेषां कर्मणां साक्षी भवति। अस्माभिः यद्यत् कृतं तत्सर्वं जानाति भवान्। अस्माभिः कृतं कुटिलं वञ्चानात्मकं पापं नाशय। वारं वारं वयं तूभ्यं नमस्कारं कुर्मः।

********